UDYANA PATRIKA BOOK 18

RSVL
00984

178 / XVIII
984

0984

984

Registered No. M 2300.

Book XVIII ॥ श्रीः ॥ Nos. 1 & 2.

# उद्यानपत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १८] कालि ५०४५ { तारण कन्या साधारण
,, तुला शास्त्रानुबन्धः
आह्लय { सं १
,, १
,, २

# The UDYANA PATRIKA.

A SANSKRIT MONTHLY.

September
October } A 17 1944

984

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्ग्ल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

TIRUPATI

# विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १०५—११२

1 मेनका ।
2 सुभाषितनीवी ।
3 अभिधेयविशेषः ।

984 0984 2



धर्मैक्यमनुसन्धेयम्। अर्थावृत्तिः प्रस्तुतानामप्रस्तुतानां वा। प्रतिवस्तूपमा तु प्रस्तुताप्रस्तुतानामिति विशेषः।

अयं चापरो विशेषः। आवृत्तिदीपकं वैधर्म्येण न सम्भवति। प्रतिवस्तूपमा तु वैधर्म्येणापि दृश्यते। यथा—

विद्वानेव विजानाति विद्वज्जनपरिश्रमम्।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्॥
यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम्।
न हि कस्तूरिकामोदः शपथेन निवार्यते॥

इति प्रतिवस्तूपमा।

---

अत एव श्रीमति स्तोत्रभाष्ये अनुगृहीतम् 'न वीक्षते अत्यासन्नमपि मकरन्दलिप्सया नाद्रियते' इति। अर्थावृत्तिरिति। 'दिद्रुतबद्ध(वर्षत्यम्बुद)मालेतिवत्'। अत्र उभयावृत्तिरपि विवक्षिता। शङ्कासमाधानयोस्तत्रा[पि तुल्यत्वा]त्। साधर्म्यसत्त्वे वाक्यभेदे च वैधर्म्यस्य दुर्वारत्वाच्च। तर्हि साधर्म्येण न सम्भवतीति वक्तव्ये कथमेवमुक्तिरिति चेत् वैधर्म्यरूपप्रकारव्युदासाय विशेषव्युत्पादनायेति दिक्। विद्वानेवेति। कविसम्मतिबलादत्र वन्ध्येति लिङ्गभेदो न दोषाय। वैधर्म्यं द्विविधं प्रकृतविजातीये तत्तदन्वितधर्माभावप्रदर्शनं तत्सजातीये तदन्वितधर्माभावाभावप्रदर्शनं चेति। आद्यस्येदमुदाहरणम्। अत्र हि बहुप्रसवैव प्रसवेदनां विजानातीति वक्तव्ये तद्विजातीये वन्ध्यायां विज्ञानाभावो दर्शित इत्यभिसन्धाय द्वितीयमुदाहरति यदीति। इदमापाततः।

'चकोर्य एव चतुराः चन्द्रिकाऽऽचामकर्मणि।
विनाऽऽवन्तीर्न निपुणाः सुदृशो रतकर्मणि॥

इत्यादिवैधर्म्यं समुदाहरद्भिः प्राचीनैः सर्वैरप्यस्य प्रकारस्य [अ]स्पृष्टत्वात्। ईदृशवैधर्म्यस्य आवृत्तिदीपकेऽपि सम्भवेन 'अयं चेति' वाक्यव्याघाताच्च। नहि 'माद्यन्ति चातकास्तत्र[ग] न न माद्यन्ति केकिनः' इति न सम्भवतीति

## १८ दृष्टान्तः ।

चेद्विम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।
त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान् ॥

यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तालङ्कारः। त्वमेव कीर्तिमानित्यत्र कीर्तिकान्त्योर्बिम्बप्रतिबिम्बभावः ।

यथा वा—
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥

---

द्रष्टव्यम् । ते गुणाः । अत्रापि कस्तूरिकामोद इति लिङ्गवचनभेदः कथंचित्समाधेयः ।

इति प्रतिवस्तूपमा ।

---

अथ दृष्टान्तः ।

चेदिति । पूर्वत्र विषयविषयिणोः एको धर्मः इह तु भिन्नौ ताविति तुल्ययोगितानन्तर्यं दृष्टान्तस्य । बिम्बप्रतिबिम्बत्वं चेत् [तत्] बिम्बप्रतिबिम्बत्वं दृष्टान्तालंकृतिरित्यर्थः । व्युत्पत्तिः स्फुटा । कयोः [बिम्बप्रति-]बिम्बत्वमिति शङ्कां वारयितुमाह—यत्रेति । बिम्बप्रतिबिम्बभावेनेति । परस्परप्रतिकोटित्वेनेत्यर्थः ।

काममिति । सहस्रं सहस्रं सहस्रशः । 'संख्यैकवचनाच्च वीप्सायाम्'मिति शस्प्रत्ययः । अनेन प्रकृतेन राज्ञा । राजन्वतीं शोभनराजयुक्ताम् । 'राजन्वान् सौराज्ये' इति निपातः । नक्षत्राणि गोबलीवर्दन्यायेन अश्विन्यादीनि प्रसिद्धानि । ताराः अप्रसिद्धानि नक्षत्राणि । ग्रहाः शुक्रादयः । सङ्कुला निबिडा । ज्योतिष्मतीत्यत्र प्राशस्त्ये मतुप् । प्रशस्तज्योतिष्केत्यर्थः। चन्द्रमसैवेति एवकारेण नक्षत्रादीनां ज्योतिष्मत्ताप्रयोजकत्वव्युदासः । अत्र शोभनराजप्रशस्तज्योतिरादीनां बिम्बप्रतिबिम्बभावः ।

यथा वा— देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लंघित एव वानरभटैः किन्त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ॥

नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेक एव धर्म इति प्रतिवस्तूपमा युक्ता । नैवम् । अचेतने मन्थाचले ज्ञानस्य बाधितत्वेन तत्र जानातीत्यनेन सागराधस्तलावधि संस्पर्शमात्रस्य विवक्षितत्वात् । अत्रोदा-

---

देवीमिति । यद्यप्यलङ्कारसर्वस्वे पूर्वोत्तरार्धव्युत्क्रमेणायं श्लोकः पठितः । तथाऽपि प्रस्तुतस्य प्रथमाभिधानौचित्यादेवमपि क्वचित् पाठदर्शनाच्च अयं पाठः । उपासते परिचिन्वन्ति । हिरत्र अवधारणे । तेन च सारपरिज्ञानव्यवच्छेदः । सारस्वतं सारस्वतीयम् । जानीते । 'अनुपसर्गाज्ज्ञः' इति तङ् । गुरुकुलक्लिष्टः गुरुकुलशुश्रूषाक्लिष्टः । लंघित एव लंघितमात्रः न तु परिज्ञातगाम्भीर्य इति भावः । गम्भीरतां अधःप्रदेशसीमानं जानाति स्पृशति । अत्र यथाश्रुते सर्वस्वकारशङ्कां दर्शयति— नन्विति । एक एव धर्म इति । पृथङ्निर्दिष्ट इति शेषः । अत्र सर्वस्वकृता 'यन्निबन्धनमौपम्यं विवक्षितं तत्र बिम्बप्रतिबिम्बभावोऽपेक्षितः' । प्रकृते तु न ज्ञाननिबन्धनं तद्विवक्षितम् । किन्तु अब्धिलंघनदिव्यवागुपासननिबन्धनमिति तत्र सः अस्त्येवे'ति समाहितम् । तन्मन्दम् । सर्वांशेऽप्यैकरूप्यसम्भवे वैरूप्यस्यानुचितत्वादित्याशयेन स्वयं समाधत्ते नैवमित्यादिना । बाधितत्वेनेति । न च अचेतनेऽपि 'जिह्वां प्रसार्य तरवो जलमर्थयन्त' इत्यादाविव चैतन्योपचारोऽस्त्विति शङ्क्यम् । प्रकृते तस्य प्रयोजनाभावात् । स्वारस्याविरोधेन गत्यन्तरसम्भवाच्चेति भावः । जानातीत्यनेनेति । गम्भीरतां जानातीत्यनेनेत्यर्थः । सागरेत्यादिना गम्भीरतापदार्थस्यापि प्रदर्शनात् । यथाश्रुते तस्य जानातिमात्रविवक्षितत्वाभावात् । न चैवमत्र गम्भीरतापदार्थप्रदर्शनमनुपयुक्तम् । जानातिमात्रे अत्र (?) आक्षेपादिति वाच्यम् । गम्भीरताख्यधर्मस्य जानातिविवक्षितस्पर्शं प्रति कर्मत्वानुपपत्त्या कर्मत्वार्हगम्भीरतापदार्थस्य वक्तव्यत्वात् । विवक्षितत्वादिति । लक्षणयेति शेषः । जानातेरावृत्त्या पदावृत्तिदीपकमाशङ्क्य परिहरति अत्रे-

हरणे पदावृत्तिदीपकाद्विशेषः पूर्ववत् प्रस्तुताप्रस्तुतविषयत्वकृतो द्रष्टव्यः।

वैधर्म्येणाप्ययं दृश्यते—

कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः।
तमांसि तिष्ठन्ति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलिताम्॥
इति दृष्टान्तः।

---

ति। पूर्ववदिति। अर्थावृत्तिदीपकात् प्रतिवस्तूपमायामिवेत्यर्थः। ननु अत्र जानाति जानीते इति इकारप्रयुक्तशब्दभेदस्य एकदेशविकृतन्यायेन स्थानिवद्भावेन वा समाधेयत्वेऽपि आत्मनेपदपरस्मैपदप्रयुक्तशब्दभेदस्य यजति-ददातिजुहोतीनां प्रकृतिभेदप्रयुक्तशब्दभेदस्येव दुर्वारत्वात् पदावृत्तिदीपक-शङ्काया उन्मेषकथाऽपि नास्तीति चोद्यमिदं वृथेति चेदत्र वदन्ति। जानीते नितरामित्यस्य स्थाने तज्जानाति तथाऽपीति पाठे तदुन्मेषसम्भवात्। तथाऽपि न तत्प्रसक्तिरिति सूचनायेदमुक्तमिति। वस्तुतस्तु प्रत्ययभेदेऽपि प्रकृति-मात्रेऽन्ये(-त्रे तुल्ये)ऽपि पदावृत्तिरेव। पदशब्देन अत्र सुबन्तस्य तिङन्तस्य वा अनभिप्रेतत्वात् वाचकमात्रस्य विवक्षितत्वाच्च। प्रकृतेरपि तथात्वात्। अत एव 'संग्रामाङ्गणसङ्गतेनेति' मालादीपके 'समासादित'मित्यत्र प्राति-पदिकस्य उचितप्रत्ययान्ततया विपरिणामेन अनुषङ्गेऽपि दीपकमभ्युपगमि-ष्यति ग्रन्थकारः। पूर्ववत् उपमापेक्षानपेक्षाभ्यामपि विशेषं दर्शयति—वैधर्म्येणापीति। अयं दृष्टान्तः। कृतं चेति। गर्वाभिमुखं कोपाभिमुखम् न तु कुपितामिति भावः। किमन्यद्वक्तव्यमित्यर्थः। निहननं झडित्यभि-नयः (भवः)। नः अस्माकम्। तावत् तावदेवेत्यर्थः। उदयाद्रिमौलितां उदयाद्रिशेखरताम्। यावन्नायाति तावदेव तिष्ठन्तीति योजना। अत्र सूर्यस्य उदयाचलाभिमुख्य एव तमांसि नश्यन्तीति वक्तव्ये तथा अनुक्त-त्वात् वैधर्म्यम्। तेन विहितत्वादेः स्थानादिना प्रतिबिम्बनमित्याहुः।

इति दृष्टान्तः।

---

## निदर्शनालङ्कारः ।

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।
यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥

---

अथ निदर्शना ।

निदर्शनायाः अभेदप्रधानत्वेन रूपकपेटिकान्तर्भावौचित्येऽपि बिम्बप्रतिबिम्बभावघटितत्वेन मतान्तरे दृष्टान्तर्गतत्वेन च दृष्टान्तैकराश्यात् पृथङ्निर्देशानन्तरमेव भेदस्य (अभेदेन) निर्देशस्य उचितत्वेन दृष्टान्तानन्तर्यावश्यंभावाच्च इह निवेशः । रूपकादिवारणाय वाक्यार्थयोरिति । तदर्थस्तु मूल एव वक्ष्यते । 'निर्गते नीरे सेतुमेषा चिकीर्षति' इति ललितालङ्कारवारणाय सदृशयोरिति । सादृश्यं च उपादानांशे बोध्यम् । तेन उपात्तयोरित्यर्थः । तथा च ललितालङ्कारे आरोप्यवाक्यार्थस्य उपादानेऽपि प्रकृतवाक्यार्थस्य अनुपादानेन तयोः सादृश्याभावान्नातिप्रसङ्ग इति भावः ।

दोर्भ्यां तितीर्षति तरङ्गवतीं भुजाभ्या-
मागन्तु(हर्तु)मिच्छति करे हरिणाङ्कबिम्बम् ।
मेरुं लिलङ्घयिषति ध्रुवमेष देव
विष्णोः पदे च विजिहीर्षति मूढलोकः ॥

इत्यादौ एकस्मिन् वर्णनीयप्रभुगुणवर्णनोद्युक्ते सदृशानेकपरस्परनिरपेक्षवाक्यार्थारोपोऽस्तीति तद्वारणाय ऐक्यपदम् । आरोपः आहार्यनिश्चयः । तेन

'त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गसमालक्ष्यकेसराब्जभ्रमावहम् ॥'

इति विशिष्टभ्रान्तिमति, तत्रैव 'भ्रमद्भृङ्गसमालक्ष्यकेसरं पङ्कजं ध्रुवम् ।' इति पाठे विशिष्टोत्प्रेक्षायां च नातिप्रसङ्गः । नितरां एकीकृत्य दर्शना निदर्शना । विशेषलक्षणमिदम् । सामान्यलक्षणं तु उक्तवक्ष्यमाणविशेषलक्षणान्यतमत्वेन क्रोडीकुर्वाणी(-त्वमि?)ति दिक् । यद्दातुरित्यत्र 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इत्यत्रेव सामान्ये नपुंसकम् । सेयमिति । विधेयाभिप्रायेण । पूर्णेन्दोरिति । आ(अ)दातुः सौम्यतेव कलाशेषस्येन्दोः

अत्राबुधजनसेवाया अरण्यरोदनादीनां च यत्तद्भ्यामैक्यारोपः ।

(२)

पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम् ।
त्वन्नेत्रयुगळं धत्ते लीलां नीलाम्बुजन्मनोः ।

अत्र नेत्रयुगळे नीलाम्बुजगतलीलापदार्थारोपो निदर्शना॥

---

स्वार्थण्यन्ताद्भावे निष्ठा । श्वपुच्छमित्यत्र संज्ञापूर्वकविधेरनित्यत्वात् 'शुनो दन्तदंष्ट्राकण्ठकुन्दवराहपुच्छपदे'ष्विति दीर्घो न । अवनमितं अवनामवत्कृतमित्यर्थः । घञन्तात् अवनामपदात् न तु निष्ठायां च(णाविष्ठवच्चे)तीदम् । यथाश्रुते 'मितां ह्रस्व' इति कृते अवनामि(तामि)ति स्यात् । जाप इति प्रामादिकः(म) । 'व्यधजपोरनुपसर्गे' इति घञपवादात् अपःप्राप्तेः । यद्वा 'जप एव जाप' इति प्रज्ञादित्वात् साधुत्वं बोध्यम् । कृ(धृ)तोऽन्धमुखदर्पणः इति पाठः । यत्तद्भ्यामिति । यत्पदे सति तदविनाभूततत्पदाध्याहारावश्यंभावादिति भावः । केचित्तु तदन्धमुखदर्पण इति पठित्वा तत्पदमपि श्लोकस्थं वर्णयन्ति । तेषां द्रव्यरूपदर्पणस्य सेवनक्रियैक्यारोपानौचित्यात् कृतपदमनुषज्य योजनीयम् । अत एव कृतोऽन्धमुखदर्पण इत्येव क्वचित्पाठ इति ध्येयम् । पूर्वनिदर्शना केवला । इयं तु मालेति भावः ।

पदार्थेति । पदार्थवृत्तिं विषयतासम्बन्धेन तद्वृत्तिम् । तद्विषयिण(णीं ?)मिति यावत् । अन्यां पूर्वविलक्षणां निदर्शनां ऐक्यारोपं एके वदन्तीति योज्यम् । किमेकेषां वाक्यार्थवृत्तिनिदर्शना नास्तीति शङ्कावारणाय अत्र तत्समुच्चयद्योतकोऽपिशब्दः । रूपकादिवारणाय अन्यामिति तदर्थः पूर्वनिदर्शनाविलक्षण(त्व)मित्युक्तम् । तच्च पूर्वत्रैक्यारोपस्य सामानाधिकरण्या(ण्य) लभ्यत्वात् अत्र तदलभ्यत्वं विवक्षितमिति न तल्लभ्यत इति (तल्लभ्यैक्यवति) रूपकादावतिप्रसङ्गः । न चैवमतिशयोक्तितो न भेत्स्यते ; नेत्रादि(षु नीलोत्पलाद्यै)क्यारोपादिति शङ्क्यम् । उपमानोपमेययोरन्यतरत्र अन्यतरधर्मारोपरूपविशेषसद्भावात् । सादृश्यमात्रप्रतिपत्तेः सर्वस्वकाराद्यर्वाचीनपर्यन्त(सर्व)सम्मतत्वेन अतिशयाभेदप्रतिपत्त्यभावाच्च ।

इत्युक्तवान् कुमारः नागच्छत् । किन्तु किल सङ्कटं तस्य समजनि, न ज्ञायते । तमन्विष्य आनेतुं मनुष्यं प्रेषयामि । कन्याया जीवितं किं तावदुत्क्रान्तं भवेदिति भयं भवति । उदारेण मनसा भवता अस्या जीवितं रक्षणीयम् । भवतः भवत्पत्नीसन्ततीनां च सहस्रकोटिपुण्यं भवेत् । ईश्वरो युष्मान् रक्षेत् । वयं भवते देयं वित्तमदत्वा न वञ्चयिष्यामः । न वयं कृतघ्नाः । दयतां भवान्" इत्यभिधाय अन्वरौत्सीत् । तत् कर्णे अगृहीतवानिव भान् हूणः प्रेङ्खोलिकां समया गत्वा स्वर्णाम्बाया नाड्यादिस्थितिं परीक्षांचक्रे । तावत् तस्य कर्मकरः कश्चित् तत्र प्रादुर्भूय स्वर्णाम्बाया बन्धनानि अपग्रथ्य व्रणान् प्रक्षाल्य भेषजं निधाय पुनर्ग्रथ्नाति स्म । अनुपदं हूणः कनकाम्बां प्रति "किमपि दैवगत्या जीवितमद्य यावत् तिष्ठति । ह्यः सायङ्कालस्यान्तरेव जीवितेन गतेन भाव्यम् । मया अन्तर्दत्तस्य भेषजस्य वीर्येण प्राणास्तिष्ठन्ति । तदेवं भेषजं अद्य सकृत् अन्तर्गमयामि । स मनुष्योऽत्र आगत्य यावत् पत्रं विलिख्य ददाति वित्तं च अर्पयति तावत् मया शस्त्रचिकित्साकरणे अहमपराधी स्याम् । तस्मात् कञ्चन पुरुषं प्रेष्य तं सपदि आनयत' । इत्यभिधाय पूर्वेद्युः नासाद्वारा अन्तर्गामितं भेषजं पुनःसकृत् अन्तर्गमयित्वा उत्थाय अगच्छत् । कवाटसमीपं गतः मुखं परावर्त्य यदि अनादृताः स्यात आसायङ्कालात् प्राणा उत्क्रान्ताः स्युः । तीव्रो विषयः । न क्रीडा । जागृत । यन्मया वक्तव्यं तदुक्तवानस्मि । पश्चान्मयि दोषो न वाच्यः । मदीयभेषजबलेनापि इतःपरं प्राणधारणं सन्दिग्धम् ।' इत्युक्त्वा बहिर्जगाम ।

हूणं प्रति कनकाम्बायाः स्थित उद्वेगः कथमपि जहास । प्रथमदिने करुणाहीनतया प्रतीतः सः तस्मिन्नहनि यत् स्ववासस्थानमागच्छत् तेन समतुष्यत् । शस्त्रव्यतिरिक्तानि चिकित्सान्तराणि तेन कृतानि दृष्ट्वा न सोऽत्यन्तं करुणाहीनः' इति, मनुष्येषु जायमानामनुकम्पामनाविष्कृत्यैव कार्यकरणशील इति, पत्रलेखनं विना शस्त्रचिकित्सां कर्तुं वस्तुतः स बिभेतीति च मेने ।

तस्माद्ह्नोऽन्तरपि वा साम्बाशिव आगतो भवेदिति निश्चितां मतिं चकार । स तु नागच्छत् । तदानीं रङ्गराजुः 'अम्ब किमत्र सन्देहो भवति । अहं सपदि धूमशकटमारुह्य चेङ्गल्पट्टु गत्वा स्वामिनमानयामि' इत्यब्रवीत् । कनकाम्बा तदनुमोदमाना अनन्तरशकटे तं चेङ्गल्पट्टु प्रति प्रेषयामास । तद्वाही शकटः दिवा तिसृषु घण्टासु चेङ्गल्पट्टु अभजत । मार्गे अभिमुखमागतेषु शकटेषु स किमागच्छतीति सावधानं पश्यन्नेव रङ्गराजुः आगच्छत् । यस्मिन् कस्मिंश्चिदपि शकटे साम्बाशिवो नादृश्यत । चेङ्गल्पट्टु- अत्र अवतीर्य शकटप्रान्ते जनविश्रमस्थानं सत्रमुपेत्य बिचिकाय । ततः अश्वशकटं कञ्चिदुपसङ्कल्प्य तेषां क्षुद्रग्रामं सायं षट्सु घण्टासु प्राप । कनकाम्बया निर्दिष्टं नीलकण्ठश्रेष्ठिनमुपगम्य 'किन्नाम उपमाण्डलिकः साम्बाशिवार्यवित्तार्थी आगच्छत् ।" इति 'स कुत्र वर्तत' इति च पर्यनुयोगमकरोत् । श्रेष्ठी 'कस्त्वं' इत्यपृच्छत । 'तस्याहं सेवकः । त्वरया तमादाय गन्तव्यम्' इति रङ्गराजुरत्रोचत् । अनुपदं श्रेष्ठी 'स धनं गृहीत्वा ह्यः सायमेव हि प्रस्थाय मद्रं गतोऽभूत् । त्वं कुत आगच्छसि' इति जगाद । तदाकर्णितवान् रङ्गराजुः अतीव विभ्रान्तः मद्रादेव हि अहमागच्छामि । न हि स तत्र आगतः । इतः कतिषु घण्टासु प्रातिष्ठत' इत्यवदत् । स सायं पञ्चसु घण्टासु अश्वशकटमुपलंविधायागच्छत् । मद्रं गमिष्यामीत्यवोचत् । कुत्र पुनरगच्छत् । नाहं जानामी'त्याह स्म श्रेष्ठी । रङ्गराजोर्मनसि इत्थमिति विवरीतुमशकया बहवो वितर्काः भीतिश्चिन्ता च वासं चक्रुः । क्व नु साम्बशिवोऽगच्छत् । का नु विपत् तस्य अजनि । अश्वशकटे गच्छति तस्मिन् किन्नु मार्गे परिमोषः कश्चन वृत्तो भवेदिति बहुधा तर्कयन् येनागतस्तमेव शकटमारुह्य चेङ्गल्पट्टु प्रति न्यवर्तत ।

कनकाम्बाप्रभृतिभिरागत्य पूर्वेद्युः प्रभाते चेङ्गल्पट्टु-अत्र अवतीर्णः साम्बशिवः कुत्र अगच्छत् किमकरोदित्यादिकं पश्येम ।

'खस्थ एव व्यतिष्ठत । 'गगनस्थं महीस्थास्ते ददृशुर्वानरोत्तमाः' इत्युक्तत्वादिति भावः । योगिनामनुकुर्वन्ति महायोगिवदव्यवधानेन भगवन्तं भजन्ते । बहुकालानुष्ठितयोगमहिम्ना यदेव योगिनः पदं गच्छन्ति तदेवोपायक्लेशमन्तरेण प्राप्तवन्त इत्यर्थः । यद्वा पूर्वयोगिनः सुग्रीवादय इव सुसङ्गता भवन्ति । 'विभीषणेनाशु जगाम सङ्गमं पतत्रिराजेन यथा पुरन्दरः' इत्युक्तत्वात् बहुवचनात्तदनुगताश्चत्वारो राक्षसा विवक्षिताः । तेषां विभीषणचित्तानुयायित्वात् परचित्तैकनिरतत्वं सुव्यक्तम् ।

एवं स्वर्गिपरतयाऽपि । केचित् क्रत्वनुष्ठायिनः पुत्रपश्वादिरूपदृष्टफलकामनायामास्तिक्यभङ्गमभिमन्यमानाः स्वर्गरूपं केवलपारलौकिकफलमेव परमप्रयोजनतया स्वीकुर्वन्ति । तद्विषयोऽयं श्लोकः । पुत्रादिष्वसङ्गिनोऽपीत्यन्वयः । खलाः खे स्वर्गे लीनाः तत्रैव सुखभूयस्त्वबुद्ध्या नित्यनिवासकुतूहलिनः । परचित्तैकनिरताः 'यथा पशुरेवं स देवाना'मिति श्रुत्युक्तक्रमेण कस्यचिद्देवगणस्येच्छानुगुणं तत्किङ्करतामातिष्ठमानाः । विश्रृंखलधियः ईदृशश्रृंखलाबन्धेऽपि सुखलवानुभवमात्रेण विश्रृंखलत्वेनात्मानमवबुद्ध्यमानाः विश्रृंखल इति धीर्येषामिति विग्रहः । 'कारागृहे कनकश्रृंखलयाऽपि बन्ध' इत्युक्तेः । योगिनामनुकुर्वन्ति पारलौकिकफललाभमात्रेण उपासकवत् परमपुरुषार्थलब्धार इति मत्वा पुनर्निवृत्तिं नावेक्षन्ते । तथा च दृष्टक्षुद्रफलाद्यलोलुपा अपि अदृष्टक्षुद्रफलेषु निर्लज्जं मज्जन्तीत्यर्थः । तदेतदभिसन्धायोक्तं प्रबोधचन्द्रोदये—'शान्तेऽनन्तमहिम्नि निर्मलचिदानन्दे तरङ्गावलीनिर्मुक्तेऽमृतसागराम्भसि मनाङ्मग्नोऽपि नाचामति । निस्सारं मृगतृष्णिकार्णवजले श्रान्त्या विमूढः पिबत्याचामत्यवगाहतेऽभिरमते मज्जत्यथोन्मज्जति' ॥ इति ।

एवमन्योऽपि मनश्चिताद्यग्निचित्परः । तत्र हि—वाजसनेयकेऽग्निरहस्ये समाम्नातम् मनश्चितो वाक्चित इत्यादि । मनसैव चयनोपकरणादिकं

परिकल्प्य तत्र मनसैव चीयमानोऽग्निर्मनश्चितः । एवं वाक्चितोऽपि । तत्र मनश्चित्याद्यग्नयः विद्यामयस्य कस्यचित् क्रतोरङ्गभूता विद्यारूपा इति निर्णीतं गुणोपसंहारपादे । ते हि परं चिन्वन्तीति व्युत्पत्त्या परब्रह्मै-वाधिकृत्य चयनात् परचित्तैकानिरताः । यथैवेष्टकाचितेनाग्निना तत्तद्देवता-माराधयन्ति फलाय तथैवेमे केवलं मनसैव परब्रह्मोद्देशेन चिन्वन्ति । तत्र मुक्तिरेव फलं फलान्तरानिच्छायाम्, अन्यथा चेदैच्छिकं सर्वमपि फलम् । उक्तं हि श्रुतप्रकाशिकायाम्—'फलकामनया कृतं चेत्तत्फलप्राप्तिः अन्यथा चेन्मुक्तिः फल'मिति । तथा चैते पुत्रादिषु क्षुद्रफलेष्वनासक्ता अपि विशृंखल-धियः किं वा फलमपेक्षणीयमिति व्यवस्थाबन्धरहितबुद्धयः । 'बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिना'मित्युक्ताव्यवस्थितबुद्धयः । खलाः खलं असारं फलमेषामिति खलाः । 'खलं भूस्थानकल्के'ष्विति विश्वः । अर्श आद्यचा मत्वर्थता । एवंभूतासारफलगामिनोऽपि योगिनामनुकुर्वन्ति विद्या-रूपक्रत्वनुष्ठानात् दहराद्युपासकतुल्या भवन्तीत्यर्थः । फलेच्छाविरहमात्रेण करस्थामपि मुक्तिं बुद्धिमान्द्यादेव किञ्चित् फलमभिलष्य परित्यजन्त्येत इति विशिष्टार्थः । उपमासमासोक्त्यादिकं यथायथमनुसन्धेयम् ॥ १ ॥

**आत्मार्थं युक्तचित्तानां मित्रमण्डलभेदिनाम् ।**
**अतिलंघितलोकानां न बन्धः केनचित् क्वचित् ॥ २ ॥**

पूर्वश्लोके खलानां योगिसाम्यप्रस्तावात् प्रकारान्तरेणापि योगिसाम्यमाख्या-स्यन् स्वचित्तैकानिरता अपि क्वचन खलाः पूर्वोक्तादत्यन्तकुटिलाः सन्तीति तद्वैषम्यं दर्शयति (आत्मेति) आत्मार्थं आत्मप्रयोजनार्थमेव । तच्च परा-नर्थ एव । युक्तचित्तानां प्रयुक्तमनस्कानां पूर्वश्लोकोक्तखलाः खलान्तर-वचनमनुसृत्य परानर्थे प्रवृत्ताः एते पुनः स्वबुद्ध्यैव तत्र प्रयतन्त इति विशेषोऽवसेयः । तन्निषेधकानि मित्राण्यपि त्यजन्तीत्याह—(मित्रेति ।) मित्रशब्द आपत्परित्रातृपरः तेषां मण्डलानि सङ्घाः तानपि भिन्दन्ति,

॥ श्रीः ॥

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ'

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १८ ] कलि ५०४९ तारण-कन्या [ सं १

## पत्रिका ॥

अष्टादशस्य वयसो ममेदानीमुपक्रमः ।
जीवन्त्या यन्मया कार्यं तद्वेद जगदीश्वरः ।

॥ संशयः ॥

चित्तिरै, वैकाशि, आनि, आडि, आवणि, पुरट्टाशि, ऐप्पाशि, कार्त्तिकै, मार्कळि, तै, माशि, पङ्गुनि इति द्राविडभाषायां द्वादश मासनामानि । चैत्रः, वैशाखः, ज्येष्ठः इत्यादीनि संस्कृतनामानि सन्त्येव । अत्र तृतीयवर्जं अन्येषां सर्वेषां संस्कृतद्राविडनाम्नां सादृश्यमसन्दिग्धम्— चैत्रः चित्तिरै इत्यादि । तृतीयमासस्य तु संस्कृतनाम्नि ज्येष्ठ इति स्थिते द्राविडनाम 'आनि' इति सर्वथा विलक्षणं दृश्यते । किमत्र मिथः कश्चन सम्बन्धोऽस्ति उत स्वतन्त्रमेवेदं द्राविडनामेति युक्तो विमर्शः ।

## अभिधेयविशेषः ॥

(अनुवृत्तम्)

छान्दोग्योपनिषदि पञ्चाग्निविद्यायामिमानि वाक्यान्याम्नायन्ते—

कुमारानु त्वाऽशिषत् पितेति । अनु हि भगव इति । वेत्थ यदितोऽधि-
प्रजाः प्रयन्तीति । न भगव इति । .... अथ नु किमनुशिष्टोऽवो-
चथाः । यो हीमानि न विद्यात् कथं सोऽनुशिष्टो ब्रुवीतेति ।

इति । अत्र 'अनुशिष्टोऽवोचथाः' 'अनुशिष्टो ब्रुवीते'ति अद्यतनवाक्यरचना-

प्रक्रियाऽननुगुणमिव दृश्यते।

> किं कस्मात् अनुशिष्टोऽस्मीत्युक्तवानसि। यो हीमान्यर्थजातानि न जानीयात् स कथमनुशिष्टोऽस्मीति वदेदित्यर्थः।

इति भाष्यकृतोऽत्र व्याचक्षते। सत्यमयमत्र विवक्षितोऽर्थः। किन्त्वेष तात्पर्यार्थः न त्वक्षरार्थः। अनेकाध्याहारप्रसङ्गात्। किमित्यप्रधानकर्मवाचि द्वितीयान्तम्। अनुशास्तेर्द्विकर्मकत्वात्। "त्वत्कर्तृकं अचिरोक्तं 'अनु हि भगवः' इत्येवंरूपं वचनं किंविषयानुशासनमत्कर्तृकं वचनम्। यो हीमानि न विद्यात् तत्कर्तृकं वचनं कथमनुशिष्टकर्तृकं वचनं भवेत्". इति त्वक्षरार्थः। त्वं नानुशिष्टः अनुशिष्टोऽस्मीति वचनमयुक्तमित्यत्र तु पर्यवसानम्।

तदेवं पूर्वप्रथमादिपदवत् अपरपदस्य कारकविशेषणतया प्रयोगस्य बहुलमुपलम्भेऽपि क्रियाविशेषणतयाऽप्यस्ति प्रयोग इति दर्शितम्—'नास्यापरं गृहान् दहाति' इति। अन्यान्यपि बहून्युदाहरणानि दातुं शक्यन्ते। तैत्तिरीयसंहितायाम्—'तस्मात् सकृदुन्नीय नापरमुन्नयेत' इति। अथर्वसंहितायाम् 'तस्य वृश्चामि ते मूलं न च्छायां करवोऽपरम्' 'या पूर्वं पतिं हित्वा ऽथान्यं विन्दतेऽपरम्' 'इमां मात्रां मिमीमहे यथापरं न मासातै'१ इति। ऐतरेयब्राह्मणे 'ओकःसारी वा इन्द्रो यत्र वा इन्द्रः पूर्वं गच्छति ऐव तत्रापरं गच्छति। 'यः सकृत् पापकं कुर्यात् कुर्यादेनत्ततोऽपरम्' 'पूर्वमन्यमपरमन्यं पादाववनेनिजे'२ इति। अत्र ऐतरेयब्राह्मणवर्जमन्यत्र सर्वत्र सस्वरः पाठः। तत्र अपरपदमाद्युदात्तम्।

---

१ अत्र 'यथा येन प्रकारेण अपरम् अन्यत् श्मशानकर्म मा माम् न आसातै नासीत न प्राप्नुयात्' इति भाष्यं दृश्यते। तत् 'मासातै' इति एकपदत्वेनैव पदपाठदर्शनात् 'यथा अपरं एतदनन्तरं न मासातै न मिमीमहि तथा इमां मात्रां मिमीमहे' इत्येवमर्थस्यातिसामञ्जस्याच्च चिन्त्यमिति भाति।

२ "पूर्वं प्रथमं अन्यं दक्षिणं पादं शोधयित्वा अपरं पश्चात् अन्यं वामं पादं शोधयामि" इति भाष्यम्।

'इन्द्राणिमासु नारिषु सुपत्नी[1] महमश्रवम् । न ह्यस्या अपरं चन जरसा मरते पतिः' इत्यस्मिन् मन्त्रे पुनरन्तोदात्तम् । किंकृतोऽयं विशेष इति न ज्ञायते । व्युत्पत्तिभेदः स्यादपि । अथापि अर्थः समानः । 'आसु नारिषु' इति प्रत्यक्षं वर्तमानकालं निर्दिश्याह । इदानीं इन्द्राणीं सुपत्नीं शोभनपतिकामश्रौषम् । अपरंचन पश्चादपि अनन्तरकालेऽपि अस्याः पतिः जरसा न हि म्रियते" इति । एवमैकरूप्येण एकवाक्यतया च योजनसम्भवे—

"अपरश्चन किञ्चन किञ्चान्यदित्यर्थः । अयमस्या अन्यो विशेषः । चनेति समुच्चये"

"अपरश्चन अन्यदप्येकमस्ति ।"

"किञ्चास्या इन्द्राण्याः पतिः....अपरश्चन अन्यद् भूतजातमिव जरसा वयोहान्या न हि मरते ।'

इति तैत्तिरीयसंहितायां ऋक्संहितायां च भट्टभास्करसायणाभ्यां कथं भाषितमिति परामष्टव्यम् ।

न ह्यस्या अपरामपि समां जरया म्रियेत पतिः[2]

इति निरुक्तकारीयं विवरणं भूयसे विस्मयाय भवति । एवं क्रियाविशेषणीभूतं अपरपदं तदर्थं च अवदधताम् 'एवं द्विरपरं लाजादि' । 'एवं द्विरपरं तूष्णीम्' । इति पारस्करगृह्ये,

दक्षिणमंसमन्ववमृश्यानन्तर्हितं नाभिदेशमभिमृशेत् पुमांसाविति ।

अथापरं[3] न्यग्रोधशुङ्गामुभयतःफलां.... ....परिक्रीयोत्थापयेत् ।

---

१ ऋक्संहितायां सुपत्नीमित्यत्र सुभगामिति पाठः ।

२ अत्र दुर्गाचार्यः—'न ह्यस्या अपरश्चन । हिशब्दो हेत्वर्थः । चनेति अप्यर्थे । यस्मादस्या अपरामपि समां संवत्सरं प्रति । कदाचिदपि पतिर्म्रियते । नापि जीर्यते ।

३ अत्र रुद्रस्कन्दीयम्—'अथेत्यानन्तर्यार्थेन प्रयोगैक्यमाह । अतो नान्तरा ब्राह्मणभोजनम् । अपरमिति कर्मान्तरत्वमाह' ।

इति खादिरगृह्ये च अपरपदस्य योऽर्थः यथा चान्वयः तदवगमे न कश्चित् क्लेशो भविष्यति । इत्थं

किम्भूतो मुनिः । पतन् आकाशादवतरन् । अपरं कथम्भूतः । पतङ्गप्रतिमः इति सन्देहविषौषधौ माघव्याख्याने,

स्पृशसि पदसरोजं पादुके निर्विघातं
प्रविशसि च समस्तां देवि शुद्धान्तकक्ष्याम् ।
अपरमपि मुरारेः पूर्वमाभीरकन्या-
स्वभिसरणविधीनामग्रिमा साक्षिणी त्वम् ॥

इति श्रीवेङ्कटनाथीये पादुकासहस्रपद्ये च । अत्र 'अपरं साक्षिण्यपि त्वं भवसि' इति योजना । एवमादिषु स्थलेषु अपरपदोक्तमनन्तरकालिकत्वं वक्तुरभिधानापेक्षयाऽपि न तु वाक्योक्तक्रियापेक्षयैवेति सम्यगवधेयम् ।

उदाहृतेषु स्थलेषु अपरत्वस्य प्रतियोगि शाब्दं आर्थं वा पूर्वत्वम् । वैशेषिकतन्त्रे तु 'परत्वापरत्वे'ति परत्वं तथा पठ्यते । एवं परत्वापरत्वयोः परस्परप्रतियोगिकत्वेऽपि ऐतरेये 'कुर्यादेनत्ततोऽपरम्' इति श्रुतस्य 'ततोऽपरम्' इत्यस्य स्थाने यदिदानीं 'ततःपरम्' इति व्यवहारः क्रियते, पूर्वापरभाव इति वक्तव्ये पूर्वपरभाव इति च, तदप्यपेक्षाविशेषनिबन्धनमिति विवेचनीयम् । तदेवं सर्वथा स्थितमेतत् यत् अपरमिति क्रियाविशेषणं पदं 'पश्चात्' 'अनन्तरं' इत्यस्मिन्नर्थे चिरात् प्रयुज्यत इति ।

इदं चात्र अन्ते वक्तव्यं भाति यदस्यैव पदस्य विकारभूतं द्राविडैः अनन्तरमित्यर्थे मुहुर्मुहुः प्रयुज्यमानं 'अपरम्' इतीदं पदमिति[१] ।

---

१ Tamil Lexicon—"அப்புறம் ८ அ+புறம். n. That side; அந்தப்பக்கம். —adv. Henceforth, after that, further more; அதன் பின்." एवं क्रियाविशेषणत्वेन वा आनन्तर्यार्थकतया वा अस्य पदस्य प्रमाणभूतेषु द्राविडग्रन्थेषु क्वचिदपि प्रयोगो नास्तीति तत्रैव निष्णाता आतिष्ठन्ते ।

Registered No. M 2300.

Book XVIII ॥ श्रीः ॥ Nos. 3 & 4.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मालिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १८.] कालि ५०४५ } तारण वृश्चिक साधारण { सं. २
,, धनु शास्त्रानुबन्धः ,, २
आहत्य ,, ४

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY.

November } 1944
December }

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani M. O. L.
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

R S V L
00984

## विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [सुधरञ्जनीसमेतः] ११३—१२०

1 मेनका ।
2 सुभाषितवीथी ।
3 अभिधेयविशेषः ।
4 आक्षेपप्रतिक्षेपः ।

ष्टयोर्धर्मयोरैक्यारोपो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्य-

---

नाया एव मालात्ववैचित्रीप्रदर्शनात् तत्सन्दंशपातितस्यापि वाक्यार्थवृत्तिनिदर्शनोदाहरणत्वमेवोचितमिति वाच्यम् । ततोऽप्यग्रे—

उत्कोपे त्वयि किञ्चिदेव चलति द्रागगूर्जरक्ष्माभृतां
मुक्ता भूर्न परं भयान्मरुजुषां यावत्तदेणीदृशाम् ।
पद्भ्यां हंसगतिर्मुखेन शशिनः कान्तिः कुचाभ्यामपि
क्षामाभ्यां सहसैव वन्यकरिणां कुम्भस्थलीविभ्रमाः ॥

इति पदार्थवृत्तिनिदर्शनाया अपि उदाहरणेन सन्दंशस्य साधारणतया निर्णायकत्वाभावात् । न ह्यत्राऽपि(स्ति) वाक्यार्थवृत्तिनिदर्शनाशङ्का । तथाऽपि वाक्यार्थवृत्तिनिदर्शनाऽवान्तरप्रकरणानुरोधात् वाक्यभेदानुरोधाद्वा तथा तात्पर्यं निश्चित्यैवमुक्तम् । तथापीत्यनन्तरं वाक्यभेदाभेदौ अनादृत्येति शेषः । विशिष्टयोरिति । बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टयोरित्यर्थः । 'यद्दातु'रित्यादौ दातृादिविशिष्टसौम्यतादेः पूर्णेन्द्वादिविशिष्टाकलङ्कतादेश्च ऐक्यारोपलक्षणसमन्वयः । न हि 'वियोगे गौडनारीणा'मित्यत्रापि सोऽस्ति । तथा हि वियोगकालीनगौडनारीगण्डतलपाण्डिमा खर्जूरीमञ्जरीगर्भरेणुपाण्डिमेति वचनव्यक्त्या भाव्यम् । तादृशवचनव्यक्त्यभावेऽपि ऐक्यारोपाभ्युपगमे हि—

अव्यात् स वो यत्र निसर्गवक्रः स्पृशत्यभिज्ञस्मरचापलीलाम् ।
जटापिनद्धोरगराजरत्नमरीचिलीढोभयकोटिरिन्दुः ॥

इत्यादावपि तादृशेन्दुलीला तादृशस्मरचापलीलेति ऐक्यारोपसम्भवात् पदार्थवृत्तिनिदर्शनामात्रोच्छेदापत्तेरिति भावः । उपमानोपमेययोरिति । निर्धारणे षष्ठीयं सप्तमी वा । इदं च घटः पटत्वमाप्नोतीत्यादिवारणाय । सामानाधिकरण्य(ण्या)लभ्यत्वं आरोपविशेषणमिति प्रकृतवैयधिकरण्यनिर्देशेन सूचितम् । तेन रूपके नातिप्रसङ्गः । अव्याप्तिनिरासाय अन्य-

तरास्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्शनेति व्यवस्थामाश्रित्या-स्माभिरयमिहोदाहृतः। एवं च

त्वयि सति शिव दातर्यस्मदभ्यर्थितानामितरमनुसरन्तो दर्शयन्तोऽर्थिमुद्राम्।
चरमचरणघातैर्दुर्ग्रहं दोग्धुकामाः
करभमनुसरामः कामधेनौ स्थितायाम्॥

---

तरत्वोपादानम्। तथा च 'वियोगे गौडनारीणा'मित्यत्र वाक्यभेदेऽपि अन्यतरास्मिन् अन्यतरधर्मारोपसत्त्वात् पदार्थवृत्तिनिदर्शनेति भावः। अयं वियोगे गौडनारीणामिति श्लोकः। इह पदार्थवृत्तिनिदर्शनायामिति। यत्र वाक्यभेदेन द्वयोरैक्यारोपः तत्र वाक्यार्थवृत्तिनिदर्शना न तु विशिष्टत्वं त(य)त्र तत्र। गौरवात्। यत्र तु तदभेदेनैक्यारोपस्तत्र पदार्थवृत्तिनिदर्शना। एवमेव हि पदार्थवृत्तिनिदर्शना वाक्यार्थवृत्तिनिदर्शनेति संज्ञाऽप्यर्थवती भवति। अन्यथा तस्याः केवलपारिभाषिकतापत्तेः। इत्थं अदुष्टव्यवस्थासम्भवे किमनया सम्प्रदायविरुद्धव्यवस्थाकल्पनया। तथा च 'वियोगे गौडनारीणा'मिति श्लोके वाक्यभेदात् वाक्यार्थवृत्तिरेव निदर्शना युक्तेत्यत आह—एवं चेति। चशब्दोऽत्रावधारणे। सम्प्रदायविरुद्धनिरुक्तव्यवस्थायां सत्यामेवेत्यर्थः। इदं वाक्यार्थवृत्तिरेव निदर्शनेत्यत्रान्वेति। अत्रावधारणेन सम्प्रदायव्यवस्थायां तत्र न स्यादिति व्यज्यते।

त्वयीति। शिवेत्यामन्त्रणम्। इतरोऽत्र नीचः। 'इतरस्त्वन्यनीचयो'रिति कोशपाठात्। नीचत्वं च कार्यादिभिर्गुणैः दुरभिगमत्वम्। तेन चरमचरणघातैः दुर्ग्रहत्वस्य प्रतिबिम्बनिर्देशः कृतो भवतीति ध्येयम्। अर्थिमुद्रां दशनप्रदर्शनादियाचकचिह्नम्। यदाहुः—"कृपणमशरणो दर्शयन् दन्तपङ्क्तिम्" इति। चरमचरणघातैः अन्त्यचरणप्रहारैः। पात्रधारणादिदोग्धृमुद्रां दर्शयन्तः। कामधेनुपदप्रयोगबलादेव सर्वाभीष्टप्रदत्वलाभात्

दोर्भ्यामब्धिं तितीर्षन्तस्तुष्टुवुस्ते गुणार्णवम्

इत्यादिषु वाक्यभेदाभावेऽपि वाक्यार्थवृत्तिरेव निदर्शना । विशिष्टयोरैक्यारोपसद्भावात् । वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन बिम्बप्रतिबिम्बभावापन्नवस्तुवैशिष्ट्यरूपयोः

---

अस्मदभ्यर्थितानां दातरीत्यस्य प्रतिनिर्देशोऽपि कृतो भवति । अत्र 'विद्या धनमिवार्जिते'त्यादाविव लिङ्गभेदः कविसम्मतिबलान्न दुष्टः । दोर्भ्यामिति । बाहुभ्यामित्यर्थः । ['इट् सनि वा' इतीटो] वैकल्पिकत्वात् तितीर्षुरिति रूपम् । वाक्यभेदेति । वाक्यभेदनियामकयत्तत्पदाद्यभावादिति भावः । वाक्यार्थवृत्तिरेवेति । न तु पदार्थवृत्तिरिति भावः । तथा च अत्र वाक्यार्थवृत्तिरेव निदर्शनेति सम्मतं प्राचामपि । यदि हि तत्र वाक्यभेदो मूलं तदाऽत्र [न] स्यादिति सम्प्रदायव्यवस्थायाः अव्याप्तिदुष्टत्वात्, तद्विरुद्धाप्यदुष्टत्वात् इयमेव व्यवस्था ज्यायसीति भावः । स्वव्यवस्थायां नायं दोष इति दर्शयति—विशिष्टयोरिति । प्रथमे इतराभ्यर्थितदातृशिबोपेक्षापूर्वकार्थिमुद्राप्रदर्शनपुरस्सरदुरभिगमनरेन्द्रानुवर्तनाविशिष्टस्य कामधेनूपेक्षापूर्वकदोग्घृमुद्राप्रदर्शनपुरस्सरदुर्ग्रहकरभानुवर्तनाविशिष्टस्य च द्वितीये अल्पवाचा गुणतुष्टूषाविशिष्टस्य दोर्भ्यां सागरतितीर्षाविशिष्टस्य चैक्यारोपसद्भावादित्यर्थः । नन्वेवं 'वाक्यार्थयोः सदृशयो'रिति लक्षणस्य त्वयि सतीति प्रकृतोदाहरणे अव्याप्तिः । तत्र वाक्यार्थयोरित्यनेन वाक्यभेदस्य विवक्षितत्वात् । अत्र च तदभावादित्यत आह—वाक्येति । लक्ष्यनामेति (वाक्यार्थयोरिति) लक्षणगतवाक्यार्थपदस्य अतीव पारिभाषिकतावारणाय वैशिष्ट्यरूपयोरिति । संसर्गरूपयोरित्यर्थः । वाक्यार्थो हि लोके संसर्ग इति तस्य तथात्वमिति भावः । न च संसर्गिणोरैक्यारोप इत्यसम्भवश्शङ्क्यः । संसर्गिणोस्तथात्वे तदन्तर्गतसंसर्गयोरपि तत्त्वावश्यम्भावात् । विशिष्टोपमायां विशेषणोपमावत् । 'बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतधर्मिणो'रिति पाठस्तु सुगम एव । प्राचां सम्प्रतिपन्नस्थलाव्याप्तिनिरासाय

प्रस्तुताप्रस्तुतधर्मयोर्विवक्षितत्वादिति । एवं च

राजसेवा मनुष्याणामसिधारावलेहनम्।
पञ्चाननपरिष्वङ्गो व्यालीवदनचुम्बनम्॥

इत्यत्र प्रस्तुताप्रस्तुतवृत्तान्तयोरेकैकपदोपात्तत्वेऽपि वाक्यार्थवृत्तिनिदर्शनाया न क्षतिः । तयोर्बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टव्यवहाररूपत्वात् । अत एव निदर्शनाया रूपकाद्भेदः । रूपके ह्य-

---

अवश्यकर्तव्यया व्यवस्थया तदसम्प्रतिपन्नस्थलेऽपि वाक्यार्थवृत्तिनिदर्शनैव फलतीत्याह—एवं चेति । उक्तोदाहरणानुरोधेन उक्तव्यवस्थायाः आवश्यकत्वे सतीत्यर्थः । धारा तीक्ष्णतरः प्रान्तविशेषः । अवलेहनं जिह्वया आलोडनम् । पञ्चाननः सिंहः । व्याळी भुजगाङ्गना । क्रौर्यातिशयद्योतनाय स्त्रीनिर्देशः । प्रस्तुतेति । राजसेवाऽसिधारावलेहनादिरूपयोरिति शेषः । तयोरिति । प्रस्तुताप्रस्तुतवृत्तान्तयोरित्यर्थः । प्राचां व्यवस्थायां दूषणान्तरमभिसं(द)धान आह—अत एवेति । उक्तव्यवस्थाश्रयणादेवेत्यर्थः । अत्र एवकारेण प्राचां व्यवस्थायां भेदसिद्धिर्नास्तीति व्यञ्जितम् । निदर्शनायाः वाक्यार्थवृत्तिनिदर्शनायाः । रूपकादिति । वाक्यभेदावलम्बिरूपकविशेषादित्यर्थः । यथाश्रुते मुखचन्द्र इत्येकवाक्यस्थले प्राचामपि वाक्यभेदघटितनिदर्शनाप्रसक्त्यभावेन बोधसिद्धेः सम्भवात् अवधारणानुपपत्तेः । भेद इति । तथा च 'यत्तस्या वदनं दृष्टं तदिदं चन्द्र एव हि' इत्यादौ वाक्यभेदेन ऐक्यारोपात् प्राचां वाक्यार्थवृत्तिनिदर्शना स्यात् । तद्वारणार्थं विशिष्टविवक्षायां अप्याश्रयणे वाक्यभेदविशेषणस्य वैयर्थ्यमिति भावः । स्वव्यवस्थायां नायं दोष इति दर्शयति—रूपके हीति । हिरत्र सम्प्रतिपत्तौ । तस्मात् एकवाक्यस्थल एव रूपकम्, वाक्यभेदस्थले तु निदर्शनैवेति भवतां सम्प्रतिपत्तिरिति भावः । रूपकेऽपीति पाठः क्वाचित्कः लेखकप्रमादमूलकः । अविशिष्टयोरिति । बिम्बप्रतिबिम्बभावापन्नवस्तुवैशिष्ट्यरहितयोरेवेत्यर्थः । ननु विशिष्टाविशिष्टभेदस्य अलङ्कारभेदप्रयोजकत्वे—

विशिष्टयोरेव मुखचन्द्रादिकयोरैक्यारोपः ।

अंघ्रिदण्डो हरेरूर्ध्वमुत्क्षिप्तो बलिनिग्रहे ।
विधिविष्टरपद्मस्य नाळदण्डो मुदेऽस्तु वः ॥

इति विशिष्टरूपकोदाहरणेऽपि न बिम्बप्रतिबिम्बभावापन्नवस्तुविशिष्टरूपता । विधिविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मवत्तासम्पादनार्थमेव तद्विशेषणोपादानात् । यद्वातुः सौम्यतेत्यादिनिदर्शनोदाहरणेषु दातृपूर्णेन्द्वादीनामानन्दकरत्वादिनेवात्र विशेषण-

---

'त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥'

इत्यादिविशिष्टोपमादेरप्यलङ्कारान्तरत्वापात इति चेत्तर्हि वाक्यभेदस्य तथात्वेऽपि 'यथा चन्द्रस्तथा मुखम्' इत्यादिवाक्यगोपमादेरपि तथात्वप्रसङ्गः । सम्प्रदायनियोगपर्यनुयोगानर्ह[त्व]शरणीकरणमिहापि तुल्यमिति दिक् । ननु उक्तव्यवस्थाश्रयणेन 'मुखं चन्द्र' इत्याद्यविशिष्टरूपकव्युदाससिद्धावपि 'अंघ्रिदण्ड' इत्यादिविशिष्टरूपकेऽतिप्रसङ्गः तदवस्थः । तत्र विशिष्टयोरैक्यारोपसत्त्वात् । अन्यथा विशिष्टरूपकत्वव्याघातादिति यथाश्रुते उन्मिषन्तीं शङ्कां वारयति—अंघ्रीति । बलिनिग्रहे तत्काले ऊर्ध्वमुत्क्षिप्तः । विष्टरपद्मं आसनपद्मम् । विशिष्टेति । ऊर्ध्वमुत्क्षिप्तत्वविशिष्टाङ्घ्रिदण्डस्य विधिविष्टरपद्मविशिष्टनाळदण्डत्वारोपादिति भावः । अपिरत्र 'आरोपस्य विशिष्टविषयत्वमस्ति । बिम्बप्रतिबिम्बभावापन्नविषयत्वं तु नास्ती'त्येकदेशाभ्युपगमद्योतकः । अविशिष्टरूपकसमुच्चयार्थो वा । बिम्बेति । प्रस्तुताप्रस्तुतयोरिति शेषः । ननु बिम्बप्रतिबिम्बभावरूपविशेषणोपादानवैयर्थ्यमित्यत आह—विधिविष्टरेति । अत्र अंघ्रिदण्डस्येति शेषः । श्लिष्टत्वं सम्बन्धः । साधारणेति । विष्टरपद्मनाळदण्डसाधारणेत्यर्थः । अत्र अवधारणेन न तु नाळदण्डविशेषणैक्यारोपार्थमिति सूचितम् । एतदेव कुत इत्यत आह—यद्वातुरिति । अत्रेति । विशिष्टरूपकोदाहरण इत्यर्थः । विशेषणयोरिति । ऊर्ध्वोत्क्षिप्तविधिविष्टरपद्मरूपांघ्रिदण्डनाळदण्डविशेषण-

योर्बिम्बप्रतिबिम्बभावाभावात् यत्र तु विषयविषयिविशेषणानां परस्परसादृश्येन बिम्बप्रतिबिम्बभावोऽस्ति।

ज्योत्स्नाभस्मच्छुरणधवळा बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम्।
द्वीपात् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमळं लाञ्छनस्य च्छलेन॥

इति सावयवरूपकोदाहरणे, तत्रापि विषयविषयिणोस्तद्विशेषणानां

---

योरित्यर्थः। बिम्बेति। सादृश्याभावादिति भावः। तथा च अत्र विशेषणाभावनिबन्धनो विशिष्टाभाव इति भावः। नन्वेवमपि सावयवरूपकेऽतिप्रसङ्ग इत्यत आह—यत्र त्विति। तुरत्र विशिष्टरूपकवैषम्यद्योतनाय।

ज्योत्स्नेति। छुरणं उद्धूळनं अन्तर्धिरवसानं च (?)। द्वीपात् द्वीपमिति। गच्छन्तीति शेषः। भ्रमतेरकर्मकत्वात्। तस्यैव वा गत्यर्थकत्वं धातूनामनेकार्थकत्वात्। मुद्राकपालं मुद्रेव हस्तग्राह्यं कपालमिति सम्प्रदायप्रदर्शनीकारः। मुद्राशब्दः परिमळशब्दश्च प्रशंसावाचिनाविति केचित्। मुद्राकपालं चिह्नभूतं कपालमित्यन्ये। कापालिकदीक्षाप्रवेशकपाल(काल)परिगृहीतोपकरणानां मुद्रोपपादनामभिर्व्यवहार इति तु रहस्यम्। सिद्धाञ्जनं सिद्धिकरमञ्जनं परिमळं चिह्नमित्याहुः। सावयवेति। अवयविन इव अवयवानामै(मप्यै)क्यारोपादिति भावः। यत्र सावयवरूपकोदाहरणे बिम्बप्रतिबिम्बभावोऽस्तीत्यन्वयः। तत्रापीति। अपिः विशिष्टाविशिष्टोभयरूपकसमुच्चायकः। विषयविषयिणोरिति। रात्रिकापालिक्योर्विषयविषयिणोरित्यर्थः। तदिति। ज्योत्स्नादीनां रात्रिरूपस(विषय)विशेषणानां भस्मादीनां कापालिकारूपविषयिविशेषणानां चेत्यर्थः। यद्यपि तद्विशेषणानामपि परस्परविषयविषयिभावसम्भवात् उभयसाधारण्येन विषयविषयिणोरिति युगपदेव वक्तुमुचितमिति पृथगुक्तिवैयर्थ्यम्। तथाऽपि प्राधान्याप्राधान्यविवक्ष-

च प्रत्येकमैक्यारोपः । न तु ज्योत्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टकापालिकीरूपविषयिणश्च विशिष्टरूपेणैक्यारोपो-ऽस्ति । तस्माद्राजसेवामनुष्याणामित्यादावपि वाक्यार्थवृत्तिनिदर्शनैव युक्ता । मतान्तरे त्विह पदार्थवृत्त्यैव निदर्शनया भाव्यमिति ।

(3)

अपरां बोधनं प्राहुः क्रिययाऽसत्सदर्थयोः ।
नश्येद्राजविरोधीति क्षीणं चन्द्रोदये तमः ॥

---

येदं बोध्यम् । प्रत्येकमिति । रात्रित्वकापालिकीत्वज्योत्स्नात्वभस्मत्वादि-रूपेणैवेत्यर्थः । अत्र एवकारव्यवच्छेद्यं दर्शयति न त्विति । ज्योत्स्ना-भस्मेत्यादि[येः] समभिव्याहारः तेन विशेषणानां विशेष्यसम्बन्धावगमात् प्रागेव परस्परमैक्यावगमादिति भावः । वस्तुतोऽविशिष्टयोः ऐक्यारोपात् अति-प्रसङ्ग(?)वारणाय विशिष्टरूपेणेति । विवक्षितं च लक्षणे तथेति न दोष इति भावः । नन्वेवं विशेष्यैक्यात् विशिष्टैक्यमपि सिद्ध्येत् ।

'नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुकरेणेव पायं पायमरम्यत ॥'

इति सावयवोपमयै(ये)व विशिष्टोपमेति तत्रातिप्रसङ्ग इति चेन्मैवम् । गम्य-कक्ष्यायां निदर्शनाया इष्टत्वेन अतिप्रसङ्गाभावादिति दिक् । प्रोक्तव्यवस्था-फलितं प्राचां सम्मतं च अर्थमुपसंहरति तस्मादिति । इत्यादावपीत्यपिना सम्प्रतिपन्नवाक्यभेदस्थलसमुच्चयः । इहेति । राजसेवेत्युदाहरण इत्यर्थः । क्वचिदत्रेति पाठः ।

अपरामिति । क्रियया असत्सदर्थयोर्बोधनं अपरां निदर्शनां प्राहुः । 'पुत्रं लभस्वात्मगुणानुरूपं' 'भवानपि सुतप्रेम्णा विनश्ये'दित्यादिवाचकबोध-कव्युदासाय क्रिययेति । असत्सदर्थयोरिति स्वरूपकथनम् । उदासीनार्थ-बोधनस्य चमत्कारशून्यस्य निबन्धनासम्भवेन अतिप्रसङ्गाभावादिति वदन्ति ।

स्वर्णाम्बावाहिनः शकटस्य तिरोभावानन्तरमपि चिरं एकावस्थानावस्थितस्य साम्बशिवस्य मनसि, यदि अविलम्बेन गत्वा रूप्याणि गृहीत्वा नागम्यते तर्हि गृहिण्याः शस्त्रचिकित्सा न यथावत् निर्वर्तेतेति मतिरुदभवत् । ततः स त्वरया स्वग्रामं गत्वा वित्तमादाय आगन्तव्यमिति मन्यमानः स्थानकाद् बहिरागत्य अश्वशकटमारुह्य पञ्चदशशिलाभ्यः परस्तात् स्थितं 'दिवास्तेयपाकं' नाम क्षुद्रग्रामं प्राप्नोत् । तत्र वार्धुषिकवृत्तौ स्थितं नीलकण्ठश्रेष्ठिनमुपसृत्य स्ववृत्तान्तं संग्रहेणोक्त्वा स्वस्य तदैव सहस्रं रूप्याण्यपेक्षितानीति सहस्रत्रयार्घं स्वगृहं आधीकरिष्यामीति चाब्रवीत् । स निर्घृणः श्रेष्ठी ऊर्ध्वमधश्च अपश्यत् । मुण्डं शिरो ममार्ज । निभृतगम्भीरं महोपधाने साचीभूतः 'पणो नाम काचो नाम । अद्यतनीं कालस्थितिं कथं भवन्तो जानन्ति । को नाम वराको रूप्यदर्शी । सर्वत्रेदानीं अवसन्नं वर्तते वित्तप्रचारः हन्त शशविषाणायते । युष्माकं पुनः सद्योऽपेक्षितम् । किमस्मद्गृहे वित्तं फलितं लम्बते । अद्य न सौकर्यमस्ति । अनन्तरे मासि शिङ्गपुरात् हुण्डिरागामिष्यति । ततःपरमागच्छत । पश्येम ।' इत्यब्रवीत् ।

तदाकर्णितवान् साम्बशिवः स्वस्य त्वरां पुनः पुनरावेद्य दीनं सानुरोधं च भाषमाणः श्रेष्ठिनं प्रार्थयामास । अभ्यधिकामपि वृद्धिं दातुं शक्यतामावेदयामास । अनुपदं श्रेष्ठी 'किमिदं 'अय्य' महत् कष्टमभूत् । नास्ति वित्तमित्युक्ते न मुञ्चसि । अस्य अल्पस्य गृहस्य कृते को नु 'अय्य' सहस्ररूप्याणि दास्यति । तिस्रस्ताम्रिका अपि नेदमर्हति अय्य ।' इत्यवदत् । अथ साम्बशिवे 'गृहं क्षेत्रं सर्वं आधीकरिष्यामी' ति, शतस्य द्वे रूप्ये वृद्धिं दास्यामी'ति, सहस्रस्य द्वे सहस्रे गृहीते इति पत्रं विलिख्य दास्यामी'ति चाङ्गीकृतवति श्रेष्ठी अर्धमनसा तत्र सम्मतिमकार्षीत् । ततः तदुचितं शासनमलिख्यत । तस्य ग्रामस्य क्रोशद्वयदूरे स्थिते उपपुस्ति सब्रेजिस्ट्रार्) कार्यालये शासनं पुस्तीकृतमासीत् । सायं पञ्चसु घण्टासु श्रेष्ठी रूप्याणि सहस्रमपि रजतात्मनैव गणयित्वा ददौ । साम्बशिवः तदादाय महान्तं मूनं बध्वा अश्वशकटे उपाविशत् । निशि

अधिक्षेपादिभिर्निराकुर्वन्तीति तथोक्तास्तान्। स्वकार्यलेशाय त्रैकालिकोपकारकर्तॄनपि परित्यजन्तीत्यर्थः। यद्वा मित्रमण्डलानि परस्परमित्रसङ्घाः तान् भिन्दन्ति पैशुन्यादिना विरुद्धमनस्कान् कुर्वन्तीति ताच्छील्यार्थकणिनिना तदेकशीलता प्रतीयते। एवं सर्वशीलानि परित्यज्य परानर्थाचरणे लोकविरोधः स्यादित्यत्राह—(अतीति) अतिलङ्घिताः तद्वाक्याद्यनादरेण तिरस्कृताः लोकाः महाजनाः यैस्तेषां केनचित् मित्रादिना राजादिना वा क्वचित् कस्मिंश्चिदपि देशे काले वा, न बन्धः न व्यवस्थेत्यर्थः। खला अपि केचित् कस्यचित् कार्यविरोधे प्रवर्तमाना अपि तन्मित्रादिमुखेन समाधानकरणाद्वा राजाज्ञादिमुखेन भीषणाद्वा निवर्त्यन्ते अमी पुनः सर्वानपि तानुल्लङ्घ्य स्वकार्यमेव निर्वर्तयन्तीति विशेष उक्त इति। यद्वा बन्धः सम्बन्धः एतादृशमित्रलोकादित्यागिना केनचिदपि न सम्बन्धः। मित्रमण्डलेभ्योऽपि द्रुह्यतां केन वा मनोबन्धः सम्भाव्यत इति हृदयम्। क्वचिदित्यनेन आपत्समयेऽपि परोक्तिश्रवणमेषां न सम्भवतीति सूचितम्। स्वात्ममात्रसाहाय्येन परानर्थकरणमेषां लक्षणमिति फलितम्।

अन्योऽपि योगिपरतयाऽर्थः। आत्मार्थं परमात्मदर्शनार्थम् आत्मन्येवात्मानं पश्येदिति श्रुत्युक्तक्रमेण स्वात्मन्येवान्तर्यामितयाऽवस्थितं परमात्मानं साक्षात्कर्तुमित्यर्थः। युक्तचित्तानां योगमार्गे सम्यगवतीर्णमनस्कानां चित्तशब्दः स्मृतिसन्तानजनकमनोऽवस्थाविशेषवाची, युक्तशब्देन यतमानसंज्ञाद्यवस्थाविशिष्टात् युञ्जानाद्व्यावृत्तिः। युक्तता च सिद्धिसमयनिष्ठः परिपाकविशेषः। अनेन फलसिद्धेः प्रतिबन्धविरहो बोद्ध्यते। मित्रमण्डलभेदिनां सूर्यमण्डलान्तर्मार्गेण परमव्योमाधिरूढानाम्। भेदश्चात्र तदन्तः प्रवेश एव। 'ऊर्ध्वमेकस्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्। ब्रह्मलोकमतिक्रम्य तेन याति परां गति'मिति प्रमाणानुरोधात् भेदशब्दः। यद्वा भेदः सम्भेदः सङ्गतिरित्यर्थः। 'भिन्नः स्यात् त्रिषु दारिते।

सङ्केतेऽन्यत्र पुच्छे चे'ति मेदिनी । अतिलङ्घित लोकानां अर्चिरादिमार्गेणाति- क्रान्तब्रह्मादिसकललोकानां केनाचित् कर्मादिरूपेण बन्धकर्गेण वा ब्रह्मादिदेव- गणेन वा, कचित् प्रकृतिमण्डले वा परमपदे वा, न बन्धः 'इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' इति सर्वलोकसञ्चारेऽपि न तेषां कर्मबन्ध- सम्बन्ध इत्यर्थः । केनचिदित्यनेन परमपुरुषेणापि नास्य पुनर्निवर्तनं सुशक- मिति भावः प्रतीयते ।

अन्योऽपि हनूमत्परोऽर्थः । आत्मार्थं आत्मतृप्त्यर्थमेव । भगवद्योगे प्रवर्तमानमनस्कानां तथा ह्युच्यते—'स्वकल्पितरघूद्वहप्रधनकेळिगाथाशतप्रयु- क्तिपथशिक्षणप्रवणसिद्धबृन्दान्वितः ।' इति । यद्वा स्वात्मतृप्त्यैव सुग्रीवसाचि- व्यादियोगे प्रवृत्तमानसानां 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः । वालिभयार्दितस्य सुग्रीवस्य उपायावधारणादिसाहाय्यमाचरन्नयं न पुन- र्वालिनः सुग्रीवाद्वा भयात् प्रवृत्ते । अपि तु सुग्रीवगुणादिपर्यालोचनेन तस्य स्नेहपात्रतामवबुद्ध्येति भावः । यद्वा सीतान्वेषणादिसमये स्वकार्य- बुद्ध्यैवानेकविधोपायावधारणमाचरितवानयं न पुनः परकार्यधियेति प्रसिद्ध- मेव तत्प्रकरणे रामायणे । मित्रमण्डलं सूर्यमण्डलं भिनत्ति भेत्तुमुद्युंक्त इति तथोक्तश्च । कुम्भकारादिशब्दवत् भेदनसामर्थ्यसद्भावमात्रेण प्रयोगो वा । प्रसिद्धमेवेदं शैशव एवायं परिपक्वफलधियोद्यन्तमादित्यं भेत्तुमुद्यत इति । यद्वा भेदः सम्भेदः सङ्गतिः सूर्यमण्डलसन्निधावेवायं स्थित्वा तस्मादध्यगीष्ट सक- लागमशास्त्राणीति पुराणप्रसिद्धेः । अतिलङ्घितलोकानां,प्रथमतो लङ्काप्रवेशार्थं अथ सञ्जीवनीलताहरणार्थं अनन्तरं पट्टाभिषेकार्थतीर्थतोयानयनार्थं चानेक- धाऽस्यान्तरिक्षादिलोकातिलङ्घनदर्शनात् । केनचित् कचिदपि न बन्धः उक्त- समयेष्वनेकविधप्रत्यूहावतरणेऽपि सर्वमपि तन्निर्धूय स्वकार्यनिर्वर्तनात् नास्य कुत्रचिदपि बन्धनं मनसाऽपि शक्यशङ्कमित्यर्थः । कचिदित्यनेन कचिदेव बन्धः । केनचित् ब्रह्मास्त्रेणेत्यप्यर्थो बोद्धयते । तथा च सर्वत्र न बन्धः किंतु

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १८ ] कलि ५०४५ तारण-वृश्चिक-धनुषी [ सं ३, ४

## अभिधेयविशेषः ॥

(अनुवृत्तम्)

## २ किशोरः ॥

किशोरपदमश्वत्वे शैशवावस्थायोगिनि प्राणिसामान्ये प्रसिद्धम् । 'मर्कटकिशोरः' 'मार्जारकिशोरः' 'नन्दकिशोरः' इति ।

वसुदेववधूस्तनन्धयं तत् किमपि ब्रह्म किशोरभावदृश्यम् ।

इति गोपालविंशतौ श्रीदेशिकः । इममर्थमभ्युपगम्य इदं साप्तमिकं जैमिनिसूत्रं शबरभाष्यं च योजयितुं न शक्यम्—

सू. भागित्वात्तु नियम्येत गुणानामभिधानत्वात् सम्बन्धादभिधानवत् यथा धेनुः किशोरेण ।

भा..... तथाऽपि वैदिक्येव नियम्येत । कथम् । यथा धेनुः किशोरेण । तद्यथा कृष्णकिशोरा धेनुरिति यद्यपि धेनुशब्दो गोधेन्वां दृष्टप्रवृत्तिः तथाऽप्यभिधानसामान्यादश्वधेन्वामपि भागीति किशोरेण लिङ्गेन अश्वधेन्वां विज्ञायते । एवमिहापि .... ।

इति । धेनुशब्दः साम्प्रतिके व्यवहारे दोग्ध्र्यां गवि प्रसिद्धः । एवं विशेषवाचित्वेन प्रसिद्धमपि धेनुपदं वस्तुतः धीयमानाश्वादिस्त्रीसाधारण्यात्सामान्यवाचीति, किशोरपदं अश्वशिशुमात्ररूपविशेषवाचीति, तेन कृष्णकिशोरा

धेनुरित्यत्र विशेषवाचिकिशोरपदसमभिव्याहाररूपेण लिङ्गेन सामान्यवाचि धेनुपदं अश्वधेनुरूपे विशेषेऽवस्थाप्यत इतीह सूत्रभाष्याभिप्रायः स्फुटः । न चैतत्सर्वं किशोरपदस्य सर्वजातीयशिशुवाचित्वमभ्युपगम्य योजयितुं शक्यते ।

रथ्यो वोढा रथस्य यः । बालः किशोरः

इत्यश्वशाब एव किशोरपदममरसिंहः पठति ।

यदस्याः कस्मैचिद्भोगाय बालान् कश्चित् प्रकृन्तति ।
ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ॥ ७ ॥

इत्याथर्वणिके वशासूक्ते (12. 4) गवाश्वादिपदोपादानं विना 'किशोराः' 'वत्सान्' इत्यभिधानं अत एव जातिविशेषप्रतीतिः सम्पत्स्यत इति कृत्वैवेत्यवश्यं वाच्यम् । तत्र किशोरा इति अश्वशिशवः वत्सा इति गोशिशव उच्यन्ते । अद्यतनोऽन्यविषयः प्रयोगो लाक्षणिक इति गतिः कल्प्या ।

## ३ नागः ॥

शाबर एव दशमान्ते 'अनपायश्च कालस्य लक्षणं हि पुरोडाशौ' इति सूत्रविवरणावसरे—

यथा नागवेलायामागन्तव्यम्, शंखवेलायामागन्तव्यम्, पटहवेलायामागन्तव्यमिति । यस्मिन् ग्रामे न नागाः न शंखाः न पटहास्तस्मिन्नपि स एव कालः । तत्र हि आगमनं क्रियते ।

इति भाष्यते । तत्र नागशब्देन किमुच्यत इति विमर्शे यद्यपि स लोके गजवाचकतया सर्पवाचकतया च प्रसिद्धः तथाऽपि शंखपटहसमभिव्याहारबलात् तस्यात्र वाद्यविशेषवाचित्वमुचितमिति प्रतीतेः अस्मत्प्रदेशे 'नागस्वनः' इति प्रथितं यद् वाद्यं तदेव आकारतः सर्पसादृश्यात् गौण्या वृत्त्या इह

नागपदेन अभिधित्सितमिति वक्तव्यम्।*

'शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे' इति वेणीसंहारपद्ये हि वैद्यशास्त्रे शल्यचिकित्साप्रकरणे प्रसिद्धमायुधविशेषं सादृश्यमूलया उपचारितवृत्त्या कङ्कवदनपदमभिदधातीति पश्यामः। तद्वत् प्रकृते औपचारिकत्वे न किञ्चिदनुपपन्नम्।

एतेन यत् कस्माचित् कालात् प्राक् किं 'नागस्वन' इति वाद्यस्य नामधेयं उत 'नादस्वन' इतीति बहवो विवदमाना आसन् तत्रापि प्रथमपक्षस्य किञ्चिदुपष्टम्भकं प्रदर्शितं भवति। (अनुवर्ति)

# आक्षेपप्रतिक्षेपः॥

(V. R. Srinivasa Tatacharya Siromani)

---

सिद्धान्तकौमुद्यां 'इको गुणवृद्धी' इति सूत्रस्य 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठत' इति वृत्तिरस्ति। अत्र उपतिष्ठत इत्येतत्सङ्गतं भवतीति व्याख्यायत। अत्रेदं चोद्यम्— गुणवृद्ध्योर्विधानाधिकरणं लक्ष्यम्। अतो यत्रेत्यस्य लक्ष्य इत्यर्थो वर्णनीयः। यत्तदोर्नित्यसम्बन्धात् तत्रेत्यस्यापि स एवार्थो वर्णनीयः। एवं सति इक इति षष्ठ्यन्तं पदमुपतिष्ठत इति वाक्यशेषो नान्वेति। लक्ष्ये इकपदोपस्थित्यभावात्। एतत्परिहाराय तत्रेत्यस्य सूत्रे इत्यर्थवर्णने यत्रेत्यत्रापि तस्यैवार्थस्य वर्णनीयतया 'गुणवृद्धी विधीयेते'इत्यंशस्तत्र नान्वेतीति। अत्रेदं केषांचिदुत्तरम्–यत्रेति पदं गुणवृद्धिशब्दाभ्यामित्यतः पूर्वं योजनीयम्। यत्रेत्यस्य यस्मिन् सूत्रे इत्यर्थः। घटकत्वं सप्तम्यर्थः। तत्रेत्यस्य तस्मिन् सूत्रे इत्यर्थः। तथा च यत्सूत्रघटकाभ्यां गुणवृद्धिशब्दाभ्यां गुणवृद्धी विधीयेते तस्मिन् सूत्रे इक इति षष्ठ्यन्तं पदं सङ्गतं भवतीत्यर्थलाभान्न कोऽपि दोष इति।

---

* 'नागवेलायामागन्तव्यम्'–It is difficult to assign a meaning to this (in) the contxet which requires that it should be some time- at which elephants are known to do something or other—perhaps to their trumpeting at feeding time ?" Saraswati Bhavana Studies Vol VIII p. 162.

अन्ये तु अस्मिन् वाक्ये अयमर्थो विधीयत इति वाक्ये एतद्वाक्यस्थविधिविषयोऽयमर्थ इति यथा प्रतीयते तथा गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते इत्यत्रापि गुणवृद्धिशब्दकरणकयत्सूत्रस्थविधिविषयौ गुणवृद्धी इत्यर्थप्रतीतेः यथाक्रममन्वयेऽपि यत्रशब्दस्य सूत्र इत्यर्थपरतैवेति न कोऽपि दोष इति वदन्ति ।

अजन्तनपुंसकलिङ्गप्रकरणे वारिशब्दनिरूपणावसरे 'आङो ना, वारिणा' इति प्रतिपाद्य तत उपरि प्रियक्रोष्टुशब्दनिरूपणावसरे टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा, प्रियक्रोष्टुना, प्रियक्रोष्ट्रे, प्रियक्रोष्टवे अन्यत्र तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव प्रियक्रोष्टुना, प्रियक्रोष्टुने इति प्रत्यपाद्यत । अत्रायमाक्षेपः—

वारिशब्दाट्टाप्रत्यये 'इकोऽचि विभक्तौ' इति वारिशब्दस्य नुमि 'आङो नाऽस्त्रियां' इति टाया नाभावे वा वारिणेति रूपे विशेषाभावेऽपि 'विप्रतिषेधे परं कार्य'मिति शास्त्रेण नुमपेक्षया नाभाव एव न्याय्य इत्यभिसन्धाय 'आङो ना' वारिणा इति यथा न्यगद्यत एवं टादौ पुंवत्वाभावपक्षे प्रियक्रोष्टुनेत्येतद्विषये नुमपेक्षया परत्वेन नाभाव एवोपन्यसनीयः । तथाऽनुक्त्वा नुमेवेति इतरव्यवच्छेदसंवलितं नुम्कथनं कथं सङ्गच्छत इति । अत्रायं परिहारः—'तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमेवे'ति वाक्यं 'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेने'ति वार्तिकांशप्रतिपादकम् । 'तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमि'ति पूर्ववाक्यस्य, एवकारघटितस्यास्य वाक्यस्य चार्थे न कोऽपि विशेषः । पूर्वविप्रतिषेधेन नुम्प्रवृत्तिकथनात्सकृद्गतिन्यायेन पुनस्तृज्वत्वस्याप्रवृत्तिः सिद्ध्यति । अयमर्थो नुमेवेत्येवकारेण स्पष्टमुच्यते न तु परभूतनाभावस्याप्रवृत्तिरत्रोच्यत इति ।

'होढ' इति सूत्रोदाहरणनिरूपणावसरे 'जश्त्वचर्त्वे लिट्, लिड्' इति वर्तते । अत्रेयं शङ्का— 'वावसाने' इति चर्त्वं झलां जशोऽन्ते इति जश्त्वस्यापवादः । अत एव रामादिति रूपसाधनावसरे स्थितं जश्त्वमिति पदमुपादाय शेखरे बाधित्वेति शेषः । अवसाने चर्त्वस्य पदान्तजश्त्वापवादत्वादित्यभ्यधीयत । अतोऽत्र प्रथममुत्सर्गजश्त्वस्य तदनु अपवादचर्त्वस्य प्रवृत्तिप्रतिपादनं कथं युज्यत इति । अयमत्र समाधिः–जश्त्वचर्त्वे इति नैकं पदम् अपि तु त्रिपदम् जश्, तु, अचर्त्वे इति च्छेदः । उत्सर्गजश् तु अपवादचर्त्वाभावे भवतीत्यर्थ इति ।

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | |
|---|---|---|
| पु. १८.] कालि ५०४५ | तारण मकर साधारण | सं ३ |
| | ,, कुंभ शास्त्रानुबन्धः | ,, ३ |
| | आहत्य | ,, ६ |


# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY


January
February } 1945


For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. **One only.**
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।
७. एतत्सम्बान्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

VIDYA PEETHA
TIRUPATI.
LIBRARY

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १२१—१२४

1 मेनका ।
2 सुभाषितनीवी ।
3 अभिधेयविशेषः ।
4 यत्तच्छब्दैकशेषः ।
5 भोग्यशब्दार्थः ।

स्खलन्ती बभूव। देहो मनश्चानियन्त्रिते अपर्यवस्थिते समतप्येताम्। तस्यां स्थितौ स तृतीयकक्ष्यापान्थानां विश्रमस्थानं गत्वा अधस्तात् उपविवेश। तत् पुनःस्थलं गोष्ठकल्पं आसीत्। तत्र अवकरः पलालः ताम्बूलनिष्ठीवनं कदलीफलत्वक् 'पट्टाणि 'चणकत्वचः इत्येवमादीनि भाण्डानि समग्राण्यभवन्। उपरि षडश्रः 'लाण्टन्'—दीप एकः मुणुक् मुणुक् इति ज्वलन्नासीत्। तत्र ज्वलन्ती ज्वाला कुत्रास्तीति दीपान्तरसाहाय्येनैव ज्ञातव्यम्। तत्र तदा अन्यः कोऽपि नावर्तत। साम्बशिवेऽधस्तादुपविष्टे तस्य देहे श्रमस्य उज्जृम्भितत्वात् शयनेच्छा समजनि। महान्तं वित्तमूतं उपधानवत् अधःशीर्षे निधाय अशेत। तस्य वित्तस्यैव स्वजीवितायमानत्वात् अप्रमत्तेन तेनेयमिति चिन्तां कुर्वन् शयित एव द्वाभ्यामपि स्वहस्ताभ्यां मूतमाश्लिष्य हस्तद्वयाङ्गुळीः एकवेणीचकार।

सपदि पञ्चभिर्निमेषैः निद्रा आगता तमपीडयत्। अथापि स क्लिष्ट्वा समाहितः सन् 'अनिद्रं तां रात्रिं कृत्स्नां तथैव जागरं कृत्वा स्थातव्यम्' इति दृढं सङ्कल्पयामास। तेन प्रकारेण पादनाडी अगलत्। तदा काचन स्त्री अल्पमेकं मूतमादाय तत्र आगत्य साम्बशिवस्य पादयोः समीपे उपविश्य ताम्बूलं भक्षयन्ती स्वामिन् 'गूडुवाञ्चेरि-गामी शकटः कदा आगच्छेत्' इत्यपृच्छत्। साम्बशिवः 'विभाते आगमिष्यति'। इत्यब्रवीत्। सा ताम्बूलं चर्वित्वा तस्य पादयोः समीपे शिश्ये। ततः परं पादनाडिका अगच्छत्। सा तस्य पुरस्यैव अपोद्धरणे अपक्षेपणे च क्षमा घोरणाः स्वनासिकाद्वारा वियोक्तुमारभत। तदानीं प्रयाणिवेषः कश्चन मनुष्यः तत्र आगत्य साम्बशिवं समया दक्षिणत उपविष्टः पठाणिचणकान् खादितुमुपाक्रमत। स तत् कर्म पादनाडीं यावत् कृत्वा साम्बशिवस्य शिरोभागे द्वयोर्हस्तयोः परतः शयितः गीतानि गातुं प्रारभत। तेवारं तिरुप्पुहळ् हिन्दुस्थानि गेजल् इत्यादीनि एकां नाडीं गीत्वा अन्ते विश्रान्तः घोरणां कर्तुमारेभे।

तदा निशि एका घण्टा बभूव। साम्बशिवः तृतीययामनिद्रायां मग्न आसीत्। क्षुधा चिरानशनेन अनिद्रतया कष्टेन च

परिश्रान्तत्वात् स गाढनिद्रायां ब्रह्मानन्द इव निमग्नोऽवर्तत । परं तु स निद्रातीति न कस्यचिद्विदितम् । तदीयगाढनिद्रा अल्पाल्पशः विघाटितुमारभत । अर्धनिद्रा अर्धजागरश्च अभवत् । तदानीं तस्य दक्षिणपादतले किमपि कुरुकुरायितमभूत् । शुना केनचित् स्वपादस्यावलेहने सति यादृक् स्यात् तादृक् कुरुकुरायितं कुञ्चनं च, किमपि सुखमसुखं च संमिश्रमवेद्यत । तेनैव तस्य गाढनिद्रा विजघटे । उपर्युपरि स निर्वृतिमयोऽनुभवोऽधिको बभासे । स किं स्वप्न इति स मेने । तदुत्थं कुरुकुरायितमसहमानः स कञ्चित् कालं क्लिष्टोऽभवत् । कोऽपि शुनक एव स्वपादं लेढीति मत्वा 'चू' इति तर्जयन् झटिति उत्थायोपविश्य चक्षुषी परिमृजन् पादप्रदेशमपश्यत् । शुनको न ददृशे । तत्पादमूले शयिता स्त्री घोरणां कुर्वती निद्राणा आसीत् । 'किं नाम शुनकोऽपधावितवान् स्यात्' इति मेने । अपि तु तावच्छीघ्रं स धावित्वा निलीन इत्येतत्प्रति विस्मितः स पूर्ववदशेत । मूतस्योपरि निधितिरितं तस्य शिरःशिलास्थले पठीरिति संघट्टनं प्राप । किं मूतोऽपसृत इति हस्ताभ्यां धरां परिमृश्य मूतं गवेषयामास । न स हस्तयोः सम्पर्कं प्राप । विभ्रान्तः अतिमात्रं विस्मितश्च साम्बाशिवः उत्थाय शिरःप्रदेशमपश्यत् । मूतश्च नादृश्यत । तत्र शयितो मनुष्यश्च नादृश्यत । यत्र क्वापि यः कोऽपि मनुष्यो नालक्ष्यत । मूतगमनस्थलं च नाज्ञायत । स्वपादमूले स्त्री परं सघोरणं सुपुप्ता अवर्तत । तस्यामपि मूतो नादृश्यत । स्वस्य स्वप्नो नु जागरो नु इति स सन्दिदिहे । द्वित्रनिमेषावधि नेत्रे परिवर्त्य परिवर्त्य विष्फार्य चत्वार्यपि पार्श्वान्यपश्यत् । प्रागेव व्याकुलां विशीर्णां तस्य बुद्धिं स भयङ्करोऽभिषङ्गः बलवदभिहत्य छिन्नाभिन्नामकरोत् । तत् किं स्थलमिति स्वयं क इति कुत्र वर्त इति च तस्य नाभात् । प्राचीनाः सर्वाः स्मृतयो व्यालुप्यन्त । उन्मादवतीव बुद्धिरभवत् । वस्तुत एव स उन्मादं प्राप । अधस्तात् विस्तृतं स्वकीयमङ्गवस्त्रमप्यनाददानःउत्थाय कटिवस्त्रमात्रेण बहिरगच्छत् । सर्वत्र तमो व्याप्तमासीत् । तस्य पुरस्य उत्तरस्यां दिशि मद्रमवर्तत । स तु दक्षिणस्यां

केनचित् क चेदित्यन्वयः। यद्वा केन ब्रह्मणा तदभिमतास्त्रेणेत्यर्थः। चिच्छब्द एवकारोऽर्थकः दिवश्चिदित्यादिप्रयोगात्। यद्वा चित् चैतन्यविशिष्टः बन्धः कश्चिदिति शेषः। ब्रह्मास्त्रसम्भावनाय तद्बन्धो बुद्धिपूर्वकमनेन सोढः न पुनश्चैतन्यभङ्ग इत्यर्थः। स्वेच्छाकारितत्वं नास्य दोषायेति भावः।

अन्योऽपि सुग्रीवपरतया। आत्मार्थे आत्मजीवनार्थमेव। युक्तचित्तानां उपायचिन्तनेषु प्रवृत्तमनस्कानां वालिनाऽभिद्रुतो हि सुग्रीवः सर्वद्वीपसमुद्रानतिलङ्घ्य लोकालोकपर्वतान्तमधावदिति व्यक्तं श्रीमद्रामायणे। अन्ततः ऋश्यमूकाक्रमणमपि कश्चिदुपायविशेष एवेति भावः। मित्रमण्डलभेदिनां स्वपलायनकाले हनूमज्जाम्बवदादि स्वमित्राणि स्वमण्डलानि सर्वाण्यपि त्यक्त्वा सहसाऽभिद्रवणात् मित्रमण्डलेभ्यो भेदिनां वियुक्तानाम्। अतिलङ्घितलोकानां लोकशब्देन नामैकदेशनिर्देशतो लोकालोकग्रहणात् तमप्युल्लङ्घितवतामित्यर्थः। केनचित् कचिदपि न बन्धः बन्धनं सम्बन्धो वा नास्ति। लोकालोकान्तप्रधाविनः केन बन्धनं सुशकं निखिलमित्रबन्धुत्यागिनां केन सम्बन्ध इति भावः।

एवं मुनिवाहनमुनिपरतयाऽपि। ते च आत्मार्थे परमात्मार्थमेव युक्तचित्ताः सदा योगैकनिष्ठमानसाः मित्रमण्डलात् स्वपोषकादन्त्यजनवर्गात् भेदिनां विभिन्नानां पोषणप्रयुक्ततत्सधर्मत्वादिसम्भावनालेशविधुराणां स्वजनविरुद्धभगवद्धर्मैकसक्तानामिति यावत्। अतिलङ्घितलोकानां लोकशब्देन नामैकदेशग्रहणतो लोकसारङ्गनामकः कश्चन विप्र उच्यते। स च तीर्थमाहरन्भगवते मद्ध्येमार्गं ध्यानैकसक्तचित्तमनपगच्छन्तममुं मुनिमन्त्यजत्वेन सम्भाव्याधिचिक्षेपेति सांप्रदायिकाः अतस्तमतिलङ्घितवतां केनचिदपि हेतुना कचिदपि स्थले न बन्धः न निर्बन्धः। वस्तुतस्तस्यायोनिजत्वात् यत्र कुत्रापि कुलेऽवतीर्णानामपि मुक्ततुल्यानाममीषां 'तषां तेजोविशेषेणे'ति न्यायेन जातिधर्माद्युत्क्रान्तत्वाच्च न केनापि शास्त्रेण निर्बन्धः समुचित इति भावः।

क्वचिदित्यनेन साक्षात् भगवद्धर्मगेहेऽपि नास्य निर्बन्ध इति प्रतीयते । यत्तु-क्तं लोकसारङ्गो भगवदाज्ञया सद्य एव स्वांसोपरि निवेश्य भगवदालयं प्रवि-श्य तत्साक्षात्कारमचीकरदिति । अनेन चेदृशविशेषेण विशिष्टानामेव न बन्ध इत्युक्त्या अद्यतनानां केषांचित् खलानामवरजातीयानां स्वयमेवात्मानं भग-वद्भक्ततयोद्घोषयतां जातिव्यवस्थाऽतिलङ्घनविषये मुनिवाहनमेव स्वस्य दृष्टान्तीकुर्वतां दन्तभङ्ग एव फलित इति हृदयम् ।

एवं विशिष्टाद्वैतिपरतयाऽपि । तथा हि । आत्मार्थं अन्तरात्माराधना-र्थमेव युक्तचित्तानां कर्मज्ञानादियोगेषु प्रवृत्तचित्तानां 'आत्मेति तूपगच्छन्ति ग्राहयन्ति चे'ति सूत्रात् तदर्थावगतेः, न ह्यद्वैतादितन्त्रेष्वीदृशमनुसन्धान-मनुशिष्यते । किं तु स्वाभिन्नत्वेनैव, शरीरात्मभावस्य जीवपरयोर्विशिष्टा-द्वैतिमात्रसम्मतत्वात् । मित्रमण्डलभेदिनां स्वतुल्यजीवात्मवर्गभेदमभ्युप-गच्छतां 'वक्त्रं वारिजमित्र'मित्यादौ मित्रशब्दस्य तुल्यार्थे प्रयोगदर्शनात् । मण्डलशब्देन सङ्ख्याबाहुल्यं विवक्षितम् । यद्वा मित्रमण्डलं परमात्मनः सुस्नि-ग्धमण्डलं तद्भेदमुपगच्छतां, 'सवयस इव ये नित्यनिर्दोषगन्धा' इति ह्युक्तम् । अथ वा मित्रमण्डलं मित्रवत् सन्निकृष्टाः, भेदिनः भेदवादिनो नैयायिका-दयः येषामिति विग्रहात् तत्सन्निकृष्टमपि वा मतमाश्रयन्त इत्युक्तःसन्निक-र्षविशेषो विवक्षित इति भावः। अतिलङ्घितलोकानां लोकशब्देन लोकायत-मतं वा तदन्तर्गतलोकशब्दवाच्यप्रत्यक्षमात्रप्रामाण्यवादो वा विवक्षितः । द्विविधा हि लोकायताः प्रत्यक्षमात्रवादिनः क्वचित् अनुमानानुमन्तार-श्च । लोकशब्देन प्रत्यक्षमायतशब्देनानुमानं च विवक्षितमित्यावेदितं सर्वार्थसिद्ध्यादौ । तत्र केवलप्रत्यक्षवादिमतमनेकयुक्तिमार्गैरतिलङ्घितवता-मित्यर्थः । उक्तं हि—'दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुरोधात शास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् । नाथोपज्ञं प्रवृत्तं बहुभि-रुपचितं यामुनेयप्रबन्धैस्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥'

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्ब्रह्मधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १८ ] कलि ५०४५ तारण-मकर-कुम्भौ [ सं ५, ६

## अभिधेयविशेषः ॥

(अनुवृत्तम्)

## ४ यत् ॥

—❀—

प्रश्नार्थस्य किंशब्दस्य चित् चन अपि इत्येवमादिभिर्योगे अर्थान्तरवाचित्वं भवति—कश्चित् कश्चन कोऽपि पुरुष इति । यस्य नाम गोत्रमभिजनोऽन्यो वा कश्चन विशेषः कण्ठतोऽभिधातुं नेष्यते स पुरुष इत्यर्थः । अत्रैव यच्छब्दमपि घटयित्वा प्रयोगः क्रियते— यः कश्चनेति । अत्रायं यच्छब्दः किं करोतीति परामर्शनीयम् । अर्थशून्य एवायं शब्द इति त्वन्याय्यम् । अर्थस्य प्रसिद्धत्वात् । अर्थविवक्षां विना बुद्धिपूर्वकारिभिर्वक्तृभिरर्थविशेषाभिधायिशब्दविशेषग्रहणायोगाच्च । तत्र 'यत् किञ्च जगत्यां जगत् । तेन त्यक्तेन' 'यत् किञ्चेह करोत्ययम् । प्राप्यान्तं कर्मणस्तस्य' इत्यादौ प्रतिनिर्देशकतच्छब्दसत्त्वान्नास्ति सङ्कटम् ।

'यत्किञ्चिदिह सामान्यं नित्यं सर्वेण कल्प्यते' । 'यः कश्चिदेव सम्बन्धः षष्ठीतत्पुरुषाद्भवेत्' । 'यां कांचिदप्युपादाय देवतां साश्रिता स्तुतिः ।' इति मीमांसावार्तिकादिस्थलेषु पुनः तच्छब्दो नास्ति । लोके चैवं बहुलं प्रयोग उपलभ्यते । यःकश्चिद् गच्छति यःकश्चिदागच्छतीति । तत्र यत्पदार्थः कुत्रान्वेतीति वाच्यम् । यत्तदोर्नित्यसम्बन्धात् 'नय

मां सारथे क्षिप्रं यत्र पार्थो धनुर्धरः ।' 'अतः परं तु प्रवितज्य वेदं त्रेधा ततो वक्ष्यति तस्य योऽर्थः' इत्यादौ यथा उचितविभक्तियोगेन तच्छब्दमध्याहृत्य वाक्यं पूर्यते तथाऽन्यत्रापीति शक्यं वक्तुम्—यः सम्भाव्यते उपस्थितो भवति स कश्चिदिति ।

परं तु अयं प्रकारः समासे न सम्भवति । अस्ति हि यत्किञ्चनकारीति भूयिष्ठो व्यवहारः । तदत्र यच्छब्द एव तच्छब्दार्थसमर्पणावधि व्याप्रियत इत्यभ्युपगन्तव्यम् । 'तेन यथाकथाचहस्ताभ्यां णयतौ' इति सूत्रेण पाणिनिः 'येन केनापि प्रकारेण' (अनादरेण) इत्यर्थे 'यथाकथाच' इत्यस्मात् णप्रत्ययं विधाय 'याथाकथाचं' इतीदं पदं निष्पादयति । तत्र प्रकृत्यन्तर्गतयथाशब्दार्थसमन्वय उक्तेनैव प्रकारेणोपपादनीयः । 'यथाप्राप्तश्च इक् श्रूयेत' इति महाभाष्ये यथा प्राप्तः तथाविध इति समासेनैव तच्छब्दार्थसमर्पणम् । एवं यथाजात इत्यमरपठिते मूर्खपर्यायपदे 'यथोक्तः प्रकारः' 'यथार्थोऽनुभवः' इत्यादिषु शास्त्रकारप्रयुक्तेषु पदान्तरेषु च द्रष्टव्यम् ।

अमितस्य महिम्नस्ते प्रयातुं पारमिच्छताम् ।
वितथा वेदपान्थानां यत्रसायंगृहा गतिः ॥

इति श्रीयादवाभ्युदयश्लोके 'यत्रसायंगृहा यत्र सायंसमयः तदेव गृहं यस्यां सा' इत्यप्पय्यदीक्षितीयं व्याख्यानम् । यत्रसायमित्येतदेव तच्छब्दार्थं गर्भीकरोतीति ह्यभिप्रायः । एतेन 'जातमनतिक्रम्य यथाजातम् । तदस्यास्तीत्यर्शआद्यचि यथाजातः' इति व्युत्पत्तिं प्रदर्शयद्भिः व्याख्यातृप्रभृतिभिर्वृथैव क्लेशोऽनुभूयत इति वेदितव्यम् । यथा जातः तथा इत्यर्थे यथापदं पुलिङ्गजातपदेन सुप्सुपेति समस्यत इति ह्ययं परमऋजुः पन्थाः । एवमेषु पदेषु यच्छब्दार्थस्य प्रथमं समभिव्याहृतजातादिपदार्थान्वयस्य आवश्यकत्वात् तदनन्तरं प्रतीयमानस्य तच्छब्दार्थस्य समासगम्यत्वमास्थेयम् । यत्किञ्चनवादीत्यादौ तु यः कश्चनेति वाक्यस्थल इव यच्छब्देनैव केवलेन तद-

वगमनमिति युक्तं भवितुम् । इत्थं यच्छब्दस्य केवलस्य तच्छब्दार्थगर्भीकरणसामर्थ्ये सति कश्चनेत्यादिसमभिव्याहारविरहेऽपि तद् भवितुमर्हतीति सुग्रहम् । यदृच्छापदं तथैव वाच्यम् । या ऋच्छा यदृच्छेति विशेषणसमासमाहुः । 'आकस्मिकी प्राप्तिः' इति तदर्थविवरणं श्वेताश्वतरे शाङ्करे । अकस्मात् अयत्नेन इत्यपि तदर्थ उच्यते * । सर्वथाऽपि यच्छब्दार्थस्य तत्र सापेक्षत्वं नास्तीति पश्यामः । तत् कथमिति चेत् 'या नाम काचित् सम्भाव्यते सा' इत्येतत्पर्यन्तं तदर्थत्वादिति वक्तव्यमिति । एवं स्थिते छान्दोग्यगते

> यथा कृताय विजितायाधरेऽयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्तः ।

इत्यस्मिन् जानश्रुत्युपाख्यानप्रकरणे

> स रैक्वः यद्वेद तदेवान्योऽपि यः कश्चिद्वेद । तज्ज्ञातमेव अन्ये जानन्ति । तज्ज्ञाने सर्वज्ञानमन्तर्गतमित्यर्थः ।

इति श्रीरङ्गरामानुजमुनिना यदभाष्यत तत्स्वारस्यं यथावद् ग्रहीतुं शक्यम् । 'यस्तद् वेद' इत्यत्रत्यस्य यच्छब्दस्य प्रतिनिर्देशपरतच्छब्दान्तरनैरपेक्ष्यमभिप्रेत्य हि 'यः कश्चित्' इति विवरणं क्रियते । इदमन्यदिहावधेयम् ।

'यां प्रथमामिष्टकामुपदधाति । इमं तया लोकमभिजयति' इत्यत्र विशेष्यानुरोधिनी लिङ्गवचने यच्छब्दोत्तरं श्रूयेते । सन्ति पुनः स्थलान्तराणि यत्र नैवं भवति । यथा—

> ऋषभो वा एष ऋतूनां, यत्संवत्सरः । ऋषभ एष यज्ञानां, यदश्वमेधः । ओजो बलं वा एतौ देवानां, यदर्काश्वमेधौ । वसूनां वा एतद्रूपं, यत्तण्डुलाः । नक्षत्राणां वा एतद्रूपं, यद्धानाः ।

---

*छान्दोग्ये उषस्त्युपाख्याने 'यदृच्छया सहसेत्यर्थः' इत्यानन्दगिरिः ।

इति। अत्रोपपत्त्यन्वेषणे इदं भाति। यत्र प्रसिद्धं पदार्थस्वरूपं तथैव कृत्वा अनुवादमात्रहेतोर्यच्छब्दघटना तत्रास्य, तादृशपदस्य ये लिङ्गवचने ते एव भवतः। यथा 'यां प्रथमामिष्टकाम्' इति। अत्र इष्टकापदस्यैव प्राधान्यं न यत्पदस्य। एतद्वैपरीत्येन तु यत्संवत्सर इत्यादौ यत्पदस्य प्राधान्यं, तदुपसर्जनत्वं संवत्सरादिपदस्य। प्रसिद्धं संवत्सरादिपदार्थस्वरूपं तिरोहितमिव कृत्वा ऋषभत्वादिरूपरूपान्तरविधानाय लिङ्गवचनकृतवैशिष्ट्यपरिहारेण सामान्यत एव अनुवादस्याभिमतत्वात्। एवं च स्वप्राधान्ये यच्छब्दस्य नपुंसकलिङ्गमेकवचनं च भवति। न तु सामानाधिकरण्येऽपि पदान्तरीये लिङ्गं वचनं वेति स्थितम्। तदिदमवदधतां "स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे। तं होवाच नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति" इत्यस्मिन् उषस्त्युपाख्यानवाक्ये 'यच्च' इत्यस्य योऽर्थः यथा चान्वयः तत्र न संशयो भवितुमर्हति। य इमे कुल्माषा मम समीपे भोजनपात्रे निहिताः इत एभ्यः अन्ये कुल्माषाः न विद्यन्ते। यच्च* यदत्यल्पमिष्येत तच्च। यत्किमपीत्यर्थः। न विद्यत इति विपरिणामेन योज्यम्। प्रतिषेधदार्ढ्याय इदं पुनरुच्यते इभ्येन। उच्छिष्टादन्यद् यत्किञ्चिदपि कुल्माष वस्तु नास्तीति। [अनुवर्ति]

---

'दुर्जनः सज्जनं द्वेष्टि दुर्बलो बलवत्तरम्।
रूपवन्तमरूपी च धनवन्तं च निर्धनः॥

अकर्मी कर्मिणं द्वेष्टि धार्मिकं च न धार्मिकः।
निर्गुणो गुणवन्तं च पुत्रैतत् कलिलक्षणम्॥

ब्राह्मणो वाऽथ वा राजा वैश्यो वा शूद्र एव वा।
प्रशस्तेषु प्रसक्ताश्चेत् प्रशस्यन्ते यशस्विनः॥'

---

* 'यदित्यव्ययं बहुवचनान्तम्' इत्यानन्दगिरिः। परं तु बहुवचनान्तं यच्छब्दान्तरं श्रूयते।

# यत्तच्छब्दैकशेषः ॥

(V. R. Srinivasa Tatacharya Siromani)

दहराधिकरणश्रीभाष्यश्रुतप्रकाशिकायां 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि'ति छान्दोग्यवाक्यविवरणपरश्रीभाष्यवाक्यव्याख्यानावसरे 'यद्वा पुंलिङ्गयच्छब्दानध्याहारेण दहरोऽस्मिन्नित्यादेरेकवाक्यत्वं मन्वान आह—तस्मिन् दहरेति। श्रुतिवाक्ये अन्तःशब्दोऽन्तर्वर्तिपरः। अस्मिन् वर्तमानो दहराकाशस्तदन्तर्वर्ति च यत्तदुभयमन्वेष्टव्यं इति वाक्यस्यार्थ इत्यर्थः। 'त्यदादीनि सर्वैर्नित्यमि' ति पुंलिङ्गनपुंसकलिङ्गयोर्यच्छब्दयोरेकशेषः। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'ति नपुंसकान्तत्वमेकवचनान्तत्वं च। तस्मादाकाशतदन्तर्गतान्वेष्टव्यगुणपरं पुंनपुंसकान्तयच्छब्दद्वयार्थविषयं तदिति पदमि'त्यभिप्राय इति ग्रन्थो दृश्यते। तद्व्याख्यानभावप्रकाशिकायां त्यदादीनीत्यादेरेकवचनान्तत्वं चेत्यन्तस्य ग्रन्थस्य व्याख्यानमेवं लक्ष्यते। 'नन्वाकाशतदन्तर्वर्तिनोर्द्वयोः कथमेकेन शब्देन परामर्शसम्भव इत्यत आह—'त्यदादीनि सर्वैरि'ति। ननु त्यदादीनीत्येकशेषे सति कथमेकवचनम्। न च 'एकवच्चास्यान्यतरस्यामि'त्येकवचनमिति वाच्यम्, 'नपुंसकमनपुंसकेने'ति सूत्रखण्डकृतैकशेषस्यैवास्येति सौत्रपदेन परामृष्टतया सूत्रान्तरकृतैकशेषस्यातथात्वादिति चेत्, 'व्यत्ययो बहुळमि'ति वा 'सुपांसुलुगि'ति वा यदिति रूपसम्भवात्। यद्वा 'कर्मणो रोमन्थतपोभ्या'मितिवत् प्रत्येकमेकत्वाभिप्रायेणैकवद्भावस्य 'द्विगुरेकवचनमि'तिवत् लिङ्गसामान्यविवक्षया नपुंसकत्वस्याप्युपपत्तेः, अत्रैव 'गतिशब्दाभ्यां तथा हि दृष्टमि'ति सूत्रे पुंलिङ्गद्विवचनान्तगतिशब्दशब्दविशेषणस्य नपुंसकलिङ्गैकवचनान्तस्य दृष्टमित्यस्य उक्तेनैव प्रकारेण निर्वाह्यत्वाच्च। एवमाद्यनेकास्वारस्यं यच्छब्दद्वयविषये त्यदादिनिवर्तकसूत्रस्याप्रवृत्तिं च हृदि निधाय पक्षान्तरमाह— 'नपुंसकमन-

पुंसकेने'ति । अत्र च वाशब्दोऽपेक्षितोऽध्याहर्तव्य' इति । अयमत्र भावप्रकाशिकाभावः—श्रुतप्रकाशिकायां पुंलिङ्गनपुंसकलिङ्गयच्छब्दद्वयविषये त्यदादीनीति सूत्रेणैकशेषः 'नपुंसकमनपुंसकेने'ति सूत्रेण नपुंसकत्वमेकवचनान्तत्वं च साध्यत इति प्रतीयते। न चैतत् श्रुतप्रकाशिकाकाराभिमतम् । 'नपुंसकमनपुंसकेने'ति सूत्रे अस्येति पदेन'नपुंसकमनपुंसकेने'ति सूत्रैकदेशाविहितैकशेषस्यैव परामर्शेन त्यदादीनीति सूत्रविहितैकशेषविषये 'एकवच्चास्यान्यतरस्या'मिति विहितैकवद्भावाप्रवृत्तेः। 'त्यदादीनी'ति सूत्रेणात्रैकवद्भाव इति वक्तुं न शक्यते । अस्येति किम् उत्तरसूत्रे एकवद्भावानुवृत्तिर्माभूदित्येवंरीत्या नपुंसकमिति सूत्रव्याख्यानेषु प्रतिपादनेन त्यदादीनीत्यत्रैकवदित्यस्यानुवृत्त्यभावावगमात् । अतोऽत्रैकवचनमयुक्तम्। अथापि 'व्यत्ययो बहुळ'मिति द्विवचनस्थाने एकवचनस्य सम्भवेन तस्य 'स्वमोर्नपुंसकादि'ति लुका वा सुपांसुलुगि'त्यादि सूत्रेण द्विवचनस्य लुका वा यदिति रूपं सिद्ध्यति । यद्वा 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोरि' ति सूत्रस्य रोमन्थतपोभ्यां कर्मभ्यामित्यादिव्याख्यानमस्ति । तत्र कर्मपदैकशेषे कर्मभ्यामिति वक्तव्ये रोमन्थतपसोः प्रत्येकं स्थितमेकत्वमादाय कर्मण इत्येकवचनं यथा प्रयुक्तम् तद्वत् दहराकाशतदन्तर्वर्तिनोः प्रत्येकं वर्तमानमेकत्वमादाय यच्छब्दयोरेकशेषे एकवचनं भवति । यथा च द्विगुरेकवचन इति वक्तव्ये लिङ्गसामान्यविवक्षया 'सामान्ये नपुंसकमिति' एकवचनपदस्य नपुंसकत्वं व्यधीयत तद्वदत्र यच्छब्दैकशेषे पुंलिङ्गे कदाचित्प्रयोक्तव्येऽपि लिङ्गसामान्यविवक्षया नपुंसकं प्रायुज्यत । इत्येकवद्भावनपुंसकत्वोपपत्तिरवश्यमाश्रयणीया । 'गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं चे'ति दहराधिकरणद्वितीयसूत्रे गतिशब्दशब्दयोर्विशेषणं दृष्टमिति पदम् । तत्र दृष्टश्च दृष्टा चेति विग्रहः । 'पुमांस्त्रिये'त्येकशेषे दृष्टाविति पुंलिङ्गद्विवचनान्तं युक्तम् । तत्र अनयैवोपपत्त्या नपुंसकैकवचनान्तत्वं सिद्ध्यति । त्यदादीनीति सूत्रेण यच्छब्दयोरेकशेषे आश्रीयमाणे नपुंसकत्वैकवद्भावविषये आर्तिकगतिरूपा उपाया आश्रयणीया भवन्ति । त्यदादीनीति सूत्रव्याख्यानेषु

स च देवदत्तश्च तौ । तद्देवदत्ताविति द्वन्द्वनिवृत्त्यर्थं वचनम् । ताविति तु सरूपसूत्रेणैव सिद्धम् देवदत्तस्यापि तच्छब्देनैव निर्देष्टुं शक्यत्वादित्युक्तत्वात् सरूपसूत्रविषयतच्छब्दद्वयविषये त्यदादीनीति सूत्रोपन्यासो नोचित इति मनसि निधाय यदित्यत्र नपुंसकैकशेषैकवचनान्तत्वसाधनाय नपुंसकमिति सूत्रं श्रुतप्रकाशिकाकार आचष्ट । यदिति रूपं त्यदादीनीत्यनेन वा नपुंसकमिति सूत्रेण वा सिद्ध्यतीत्येव तदाशयः । एकवचनान्तत्वं चेत्यनन्तरमपेक्षितवाशब्दाध्याहारात् नपुंसकमिति सूत्रोपन्यासस्य पक्षान्तरत्वमुपपद्यत इति । श्रुतप्रकाशिकायां, अष्टाध्याय्यां त्यदादीनीत्यस्य नपुंसकमित्येतदपेक्षया परत्वात् प्रथमं त्यदादीनीत्यस्यानन्तरं नपुंसकमित्यस्योपन्यासः । दहराकाशतदन्तर्वर्तिगुणप्रतिपादकयच्छब्दद्वयार्थप्रतिपादके तदन्वेष्टव्यमित्यत्रत्यतच्छब्देऽपि नपुंसकैकशेषैकवद्भावसिद्धये यच्छब्दविषये उक्तः प्रकारोऽनुसर्तव्य इति श्रुतप्रकाशिकाशयः । अत्र भावप्रकाशिकायां, त्यदादीनीति सूत्रेणैकशेषे 'त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि' 'पुंनपुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकत्वं भवतीति वार्तिकप्रदीपाभ्यां नपुंसकैकशेषसम्भवात् एकवचनमात्रमाक्षिप्यत । पश्चात्तु त्यदादितः शेष इति वचनस्यैतद्विषये शब्दपरविप्रतिषेधसापेक्षत्वात्तदुपेक्ष्य दृष्टमित्याद्यर्थमवश्याश्रयणीयया लिङ्गसामान्यविवक्षयैव नपुंसकत्वमुपपाद्यत । उपनिषद्भाष्यादौ तु त्यदादीनीति सूत्रेण यत् तदिति रूपयोरेकशेषसाधने क्लिष्टगतिराश्रयणीया भवतीत्यभिसन्धाय नपुंसकमिति सूत्रमात्रं प्रमाणतयाऽभ्यधीयत । महाभाष्ये तु 'प्रधाने कार्यसंप्रत्ययाच्छेषः ।' 'आकृतिवाचित्वादेकवचनम् ।' 'यदा द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यत' इति वार्तिकन्यायैर्नपुंसकैकशेषैकवद्भावादिकं साधयित्वा नपुंसकमिति सम्पूर्णसूत्रं 'सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धमि'त्यनेन त्यदादीनीति सूत्रं च प्रत्याख्यायत । तदा तु यत् तत् इति रूपसिद्ध्यै सरूपसूत्रेणैकशेषे कृते नपुंसकैकवचनान्तत्वं महाभाष्यप्रदर्शितवार्तिकाभ्यां वा दृष्टमिति रूपसिद्ध्यर्थमवश्याश्रयणीयतयोक्तया प्रक्रियया वा साधनीयं भवति ।

# भोग्यशब्दार्थः ॥

‘भोज्यं भक्ष्ये’ इति पाणिनिसूत्रम् । भक्ष्ये गम्यमाने भुजेः कुत्वाभावो निपात्यत इति तदर्थः । भक्ष्यमिहाभ्यवहार्यमात्रं विवक्षितं न तु खरविशदमभ्यवहार्यम् । तेन भोज्या यवागूरित्यत्रापि सिद्ध्यति । पालनीये उपभोगार्हे च भोग्यमिति कुत्वघटितं रूपं भवति । ‘भोज्यं भक्ष्यं लेह्यं पेयमित्यत्र गोबलीवर्दन्यायेन विशेषविषयत्वं भुजिभक्ष्योर्ज्ञेयमि’ति कैयटः । तेन ‘भक्ष्यभोज्याद्यनेकश’ इत्यादौ पौनरुक्त्यशङ्का न । पूर्वोक्तसूत्रेण भक्ष्ये भोज्यशब्दः साधुर्न तु भोग्यशब्द इति गम्यते । ततश्च श्वेताश्वतरे ‘भोक्ता भोग्यं प्रेरितारं चे’त्यत्र अचिद्वृन्दे भक्ष्यरूपांशघटिते भोग्यशब्दः कथं युक्त इति चोद्यं प्राप्नोति । इह केचिदाहुः-अत्र प्रेरितेति प्रयोग कार्ये प्रेरितारमिति छान्दसप्रयोगवत् भक्ष्येऽपि छान्दसो भोग्यशब्दप्रयोग इति । अन्ये तु ‘अन्नमशितं’ इत्यादावन्नादिपदेषु ‘वैशेष्यात्तु तद्वादस्तद्वादः’ इति ब्रह्मसूत्रोक्तरीत्या ‘प्राणस्तेजसी’ त्यत्र भूताधिकरणोक्तरीत्या ‘आपः पुरुषवचसो भवन्ती’ त्यत्राबंशस्य भूयस्त्वात्तद्युक्तस्य भूतवर्गस्याप्छब्देन व्यपदेश इति ‘त्र्यात्मकत्वात्तु भूयस्त्वादि’ति ब्रह्मसूत्रोक्तरीत्या च भक्ष्याभक्ष्यात्मकाचिद्वृन्दे अभक्ष्यरूपांशस्य प्राचुर्यात्तद्बोधकभोग्यशब्देन तद्वृन्दस्य निर्देश इति वदन्ति । अपरे तु छत्रिणो यान्तीत्यत्र छत्रिपदं यथा छत्र्यछत्रिबोधकं तद्वत् ‘ऋतं पिबन्तावि’त्येतत् कर्मफलभोक्तृजीवतदभोक्तृब्रह्मप्रतिपादकमित्यधिकरणसारावल्यां ‘भोक्तृता तु द्वयोस्तु ... छत्रिनीत्याऽथवा स्यादि’ त्यत्राभ्यधीयत । तद्वदत्राभक्ष्यपदार्थानां भूयस्त्वाभावेऽपि भोग्यपदं भोग्याभोग्यप्रतिपादनाय कल्पते । ‘प्राणस्तेजसी’त्यत्रैकवचनान्ते तेजसीति पदे अधिकरणसारावळ्यां छत्रिन्यायप्रवृत्तिसूचनात् भोग्यमित्यत्रापि तन्न्यायप्रवृत्तिर्निराबाधेत्याचक्षते । भोग्यत्वमत्र पालनीयत्वम् । अचेतनस्य सर्वस्यापि भगवता पालनीयत्वात् तस्य भोग्यशब्देन निर्देश इति वचनं तु न युक्तम् चेतनोऽपि हि भगवता पाल्यते । किञ्च भोक्तेत्यत्र भुजेर्न पालनमर्थः अपि तूपभोगः । अतो भोग्यमित्यत्रापि तस्य स एवार्थ उचितः । ‘देहाद्यं भोग्यनीत्ये’त्याधिकरणसारावळीप्रयोगादावपीदं यथार्हमनुसन्धेयम् ।

[V.R.S.T.]

Registered No. M 2300.

Book XVIII ॥ श्रीः ॥ Nos. 7 & 8.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुंगम्यमिच्छति ॥


पु. १८.] कालि ५०४५ } तारण मीन-साधारण { सं ४
,, ५०४६ } पार्थिव मेष-शास्त्रानुबन्धः { ,, ४
स्वाहत्य { ,, ८


# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

March } April } 1945

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. **One only.**

Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghávan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari* *Panditaraja* **D. T. Tatacharya Siromani M. O. L.,** Curator, Sri Venkateswara Oriental Institute,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] १२५—१३२

1 मेनका ।
2 सुभाषितनीवी ।
3 मन्दिरेक्षणा । (2)
4 योग्यशब्दार्थः ।
5 पुस्तकपरामर्शः ।

दिशि चरन् क्षेत्रेषु मर्यादासु च पतित्वा उत्थाय गन्तुमारेभे। अत्र वयं गच्छाम इत्यजानन् उन्मत्तः सञ्चचार।

तत्पादमूले शयितैव शुनकवत् तत्पादतलं लीढ्वा तस्योत्थानसमये अपसृत्य शयित्वा प्रारणाकरणच्छलं चकार। तस्मिन्नुत्थाय पादप्रदेशं पश्यति शिरःप्रदेशे सञ्ज्ञः स्थितो मनुष्यः मूलमादाय निःशब्दं त्वरितमपाक्रामत्। मद्रगामी शकटः तदानीं नास्तीति स्थानकाधिपतिना साम्बशिवं प्रति कथनानन्तरं यदाऽयं चित्तमूलं बिभ्रत् शकटार्थमटति स्म तदा वित्तं कलकलशब्दमकरोदित्यवोचाम किल। तदा तदवाहितवान् कश्चन भारवह एव स्वगृहिणीसाहाय्येन तावच्चतुरं चोरितवान्।

---

# २२ अधिकारः॥

---

विम्बः उत इक्षुः?

रायपेट्टै-वैद्यशालायां भृशदीर्घा विशालाश्च बहवः शाला अवर्तन्त। तत्र एकैकस्यां विंशतिः पञ्चविंशतिर्वा अयःखट्वाः स्थापिता आसन्। एकैकस्यां एकैको रुग्णः शयित आसीत्। रुग्णानामपेक्षितं ज्ञात्वा तानुपचरितुं एकैकस्यां शालायां द्वे द्वे स्त्रियौ नियुक्ते अभवताम्। मद्रवैद्यशालासु ताः प्रायः श्वेत-(कञ्चुकधारि)जातिभवाः युवतयोऽभवन्। सुन्दर्यः यौवनशालिन्यः, सुमुखता, प्रीतिः, निरन्तरोद्यमः, अनालस्यं, अनुकम्पा इत्यादिगुणसम्पन्नाः, वैद्यशालानियमानुरोधेन कर्तव्यकरणे तत्परा अस्खलन्त्यः, साधारणलोकव्यवहारेषु एतद्देशजनैः अज्ञातसंसर्गाः श्वेतस्त्रियः अथापि मूर्तमिव प्रेम अनवलोकितपूर्वया प्रक्रियया शुश्रूषाकारिण्यः, इत्येतैः कारणैः 'किमिमाः अमृतकल्पाः सञ्जीवन्यः किं गन्धर्वकान्ताः किं कामधेनवः किं वा कल्पलता इति रुग्णैर्दृष्टाः कालोचितमुपकृत्य तान् प्रहर्षयन्त्य आसन्। औषधेन येषां स्वास्थ्यं तेभ्योऽधिकाः तासां रमणीनां प्रीतिमयैरुपचारैः स्वास्थ्यं प्राप्नुवन्त इत्येव मन्तव्यम्।



SANSKRIT VIDYA P...

एवंविधायां कस्यांचिच्छालायां वराहस्वामी, 'किं जीवति उत निर्जीवः' इति संशयार्हायां स्थितौ कस्यांचित् खट्वायां शयित आसीत् । तस्य शरीरे व्रणाः पूर्णा अभवन् । साम्बशिवः कनकाम्बा इत्यार्यः द्वयोऽपि तमुपेत्य दृष्ट्वा यदा निवृत्ताः ततः स खट्वया सार्धं शालान्तरंप्रति क्षिप्त आसीत् । तत्र तस्य जानुनि भग्नमस्थि सजीकृत्य बद्धमभूत् । तस्यां दशायां पुनस्तस्य श्रमदानमयुक्तमिति मत्वा भिषक् तं तत्रैव एकाकिनममुञ्चत् । अनुन्मीलितनयनः निश्चलश्च स तथैव नक्तन्दिवं शिश्ये । नायमितःपरं जीवेदिति यदि जीवेत् दैवकृतं तदिति च महाहूणस्याभिप्रायः । पेरियताम्बिमरकायस्य प्रासादे व्याधिना शयितायाः मेनकाख्यायाः कन्यायाः पतिरेव स इत्यवगमानन्तरं भिषक् हूणो तस्य विषये सादरमवलोकयन्नासीत् । भिषजि हूणे तदीयकुटुम्बवृत्तान्तं सर्वं कथयित्वा तस्य असंख्येयानि सौकर्याणि संविधानानि च कारयामास । विविक्तायामेव शालायां अशब्दं अचलनं च तं अवर्तयताम् । तदुचिताः शुश्रूषाः कर्तुं, नक्तन्दिवं प्रतीक्ष्य प्रतिघण्टं भेषजं दातुं च सज्जा काचन श्वेतधात्री नियुक्ता । एवं द्वित्राण्यहान्यभूवन् । तीव्रो ज्वरः प्रादुरभूत् । व्रणाः सर्वे पूयोद्भवार्हां दशां प्राप्य विण् विण् इति विदीर्यमाणाः असह्यां रुजमकार्षुः । बुद्धिः छिद्रुरीबभूव । प्रलपितुमारभ्य 'अयि चाण्डालि, द्रोहकारिणि, आत्मानं रक्षित्वा गता न्वसि । ममोपरि मोटारशकटं बुद्धिपूर्वमारोप्य मां मारयितुं नु व्यवसिताऽसि । आः ! मायाण्डि-पिल्लै- अस्य व्यामोहो नु । एकेन प्रहारेण मूर्धानं हि भिन्नवान् भवेयम् । महोपधानं नाम, उपधानानि नाम, अलङ्कारो नाम । मां दृष्ट्वा नेत्रं नु मीलयसि' इति वदति । दन्तान् नरनरेति दृष्ट्वा शब्दायते । मुक्-करण-मुणमुण-करणादिविक्रियाचिह्नानि जायन्ते । वपुः किञ्चिल्लुठति । श्वेतधात्री तु निर्निमेषं सविधे उपविष्टा महार्घाणि दुर्लभानि भेषजानि अनुपरतप्रयत्नं दत्त्वा निमिषे निमिषे दृष्टान् मुखविकारान् सावधानं गृह्णती महत्या चिन्तया उपविष्टा वर्तते । प्रातः सायं च महाभिषक् हूणो च आगत्य तदीयां स्थितिं सम्यक् परिशील्य

इति । अद्वैतिनां तु 'सांख्यसौगतचार्वाकसङ्कराच्छङ्करोदय' इत्युक्तेश्चार्वाकसख्यमावश्यकमिति भावः । न बन्धः- शास्त्रेण युक्तिबलेन वा केनचित् न बन्धः- न समन्वयासामर्थ्यं शास्त्रेण बद्धोऽयं वादीत्यादौ समाधानकथनासामर्थ्यमेव हि बन्धशब्दार्थः । स च कुत्रापि वाक्ये नास्तीत्यर्थः । उक्तं हि—'नित्यं हेयगुणावधूननपरा नैर्गुण्यवादाः श्रुतौ मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनाद्ब्रह्मणः । अद्वैतश्रुतयो विशिष्टविषया निष्कृष्टरूपाश्रया भेदोक्तिस्तदिहाखिलश्रुतिहितं रामानुजार्यं मतम् ॥' इति ।

एवं कुलटाजनविषयकोऽप्यर्थः । ते चात्मतृप्त्यर्थमेव चित्तानि प्रेरयन्ति स्वेच्छया । सर्वत्र दाक्षिण्यवशात् प्रतिदिनं मित्रमण्डलानि विभिद्यन्ते । लोकमर्यादां चातिक्रामन्तीति तेषां कश्चित्केनापि न व्यवस्था कर्तुमुचितेति भावः ।

एवं प्रकृतिमण्डलपरतयाऽपि । आत्मार्थं- देहार्थं 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनी'ति वैजयन्ती । युक्ताचित्तानां- युक्ता चित्ता येषामिति युक्तचिताः चितो भावः चित्ता- चैतन्यं तथा च देहादिरूपपरिणामसिद्ध्यर्थं चैतन्यसम्बन्धमङ्गीकुर्वतां स्वसहायभूतं मित्रमण्डलं जीवात्मवर्गमपि भेदयतां प्रलोभयतां चतुर्दशभुवनान्यप्यतिलङ्घितवतां प्रकृतिपदार्थानां न बन्धः न वशीकरणं सुशकं किन्तु केनचित् परमात्मसङ्कल्पेनैव कश्चिज्जीवविशेषे बन्धः तद्वशीकारः सम्भवति । सर्पबन्धनं रसबन्धनमित्यादौ बन्धशब्दस्य वशीकारे प्रयुक्तेः । अनयाऽहं वशीभूत इति दशामतीत्य तद्वशीकरणसाधनं दुश्शकमिति भावः ॥ २ ॥

**स्नेहः शैत्यं प्रसादश्च कोशत्यागश्च जायते ।**
**आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ॥ ३ ॥**

उक्ताः खलु खलाः केचित् परविरोधमात्राचरणचणाः । अन्ये च केचित् परविरोधप्रवणास्तदर्थं स्नेहादिकमपि प्रथमं कुर्वन्ति ; तान् प्रत्याह(स्नेह) इति ।

आसन्नपरपीडार्थं- आसन्नाः समीपस्थाः ये परे स्वभिन्नाः सर्वेऽपि तत्पीडार्थं उपद्रवकरणाद्युद्देशेन । असितात्मनः- अशुद्धमनस्कस्य तत्स्वभावस्य वा । निस्त्रिंशस्य-नृशंसस्य ।'नृशंसखड्गौ निस्त्रिंशा' वित्यमरः । स्नेहः-अनुरागविशेषः तद्भावनमिति यावत् । घातुकस्वभावस्य वास्तवस्नेहाद्यसम्भवात् । एवमग्रेऽपि । शैत्यं- शीतळतरवाक्यप्रयोगः काटवादिराहितोच्चारणमिति यावत् । प्रसादश्च- मुखविकाससस्मितावलोकनादिकं च । कोशत्यागश्च- अगतिकस्थले किञ्चिदर्थ- प्रदानादिकं च जायते । स्वयमेवोत्पद्यते न तु प्रीत्या ददाति । किंतु पीडा- र्थमेव सर्वमाविर्भवतीति । स्नेहशैत्यप्रसादत एव सर्वत्र कार्यं साधयन्ति । क्वचित् कोशत्यागत इति विभागद्योतनाय चकारद्वयम् । स्नेहादिकमन्त- रेण पीडाकरणमेवैषां स्वाभाविकधर्मः । क्वचित्परमर्मवेदनेन तदन्तश्छि- द्रादिसम्पादनाय स्नेहादिभावनमिति हृदयम् । सौनिकशकुन्तिकान्यायोऽत्र द्रष्टव्यः । उक्तं हि —'दुर्जनैरुच्यमानानि वचांसि मधुराण्यपि । अकालकुसु- मानीव जनयन्ति भयं नृणाम् ॥ इति । अत्र परशब्देन स्नेहादिकर्मभूना- दन्य उच्यत इत्यपि सुवचम् । तथा चान्यपीडार्थमन्यत्र स्नेहादिकं कुर्व- न्तीत्यर्थः । स्वमात्रेणाशक्यायां कस्यचित् पीडायामन्यसाहाय्यापेक्षया तत्र स्नेहादिकं कुर्वन्तीति यावत् । यथा कर्णस्य पाण्डवपीडार्थं दुर्योधना- दिना स्नेहादिकम् । कोशत्यागश्च सर्वविषयः । स्वकक्ष्यायामेव सर्वे तिष्ठन्त्विति धिया कर्णस्य सर्वत्र कोशदानमिति द्रष्टव्यम् । आसन्नशब्दाच्च नृशंसस्य स्वस्वभावनिर्वर्तनाय न स्थलान्तरमन्वेषितव्यम् । किन्तु समीपस्थे यत्र कुत्रचिदपि तत्करणं पर्याप्तमिति द्योत्यते । न चैतावता दूरस्थजनपीडनं नास्य स्वाभाविकमिति भ्रमितव्यम् । 'सर्पादिवत् त्वदपराधिषु दूरयाता' इति न्यायेन दुर्जनदर्शनमात्रेण सुदूरमपसरतो जनान् नैते बाधितुं प्रयतन्ते यथा सर्पादय इत्यर्थस्यैवासन्नशब्देन बोधनात् दूरस्थजनानन्विष्यानन्तरं तद्बाधा- करणे विलम्बक्लेशभयात् सविधस्थ एव स्वकार्यं निर्वर्तयन्तीत्यप्यर्थः । यद्वा

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १८] कलि {५०४५ तारण-मीन, ५०४६ पार्थिव-मेष.} [सं ७, ८.

## मदिरेक्षणा ॥ (2)

१७ पुस्तके ७२-७४ पुटेषु प्रकाशितस्य एतद्विषयस्य लेखस्य वैशद्यार्थं अल्पा टिप्पणी इयं प्रकाश्यते ।

* 'इदमवधारणमपरे न क्षमन्ते' इति । प्रथमपक्षे अवधारणम् । मदिरेत्यस्य पदस्य सुराद्यर्थवाचित्वं नैव युक्तमिति । द्वितीये तु प्रामाणिकं चेदर्थान्तरमप्यस्तु । सुरेव मनोहरं ईक्षणं यस्याः सेति व्याख्यातृभिरुक्तोऽप्यर्थो न दुष्यतीति पक्षान्तराभ्यनुज्ञया अर्थान्तरकथनम् ।

* 'मदिरो मत्तखञ्जन इति कस्मिन् कोशे पठ्यत इति न जानीमः' इति । न जानीमः । नोपलभामहे । योग्यानुपलब्धिरूपप्रमाणमस्ति । तेन तादृशः कोशो नास्तीति, कल्पनामात्रसिद्ध इति, निश्चिनुम इत्यर्थः ।

* 'शब्दकल्पद्रुमादिषु स्त्रीलिङ्गमेव पठित्वा सुरा मत्तखञ्जन इत्यर्थद्वयमुक्त'मिति । एवं शब्दकल्पद्रुमे दृश्यते—

मदिरः, पुं, (मद्+किरच् ।) रक्तखदिरः । इति शब्दचन्द्रिका ।

मदकरं, त्रि । यथा, ऋग्वेदे ५. ६१. ११.

'य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ।'

'मदिरं मदकरं मधु' इति तद्भाष्ये सायनः ।

**मदिरा**, स्त्री (माद्यतीति। मद्+किरच्। अजादित्वाट्टाप्।) मत्तखञ्जनः। इति शब्दरत्नावली। (यथा शाकुन्तले ३. ५. 'यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति')

माद्यत्यनयेति (मद्+इषिमदीति किरच्।) मादकद्रव्यविशेषः। अत्र पुंलिङ्गशब्दमुपादायापि खञ्जनार्थत्वं नोक्तम्। स्त्रीलिङ्गमुपादाय टाप्-प्रत्ययान्तत्वं व्युत्पाद्य मत्तखञ्जन इति पुंपक्षिवाचित्वं शब्दरत्नावलीं प्रमाणीकृत्य प्रादर्शि। तेन खञ्जनपक्षिवाचो 'मदिरः' इति शब्दो नास्तीति स्पष्टम्।

इदानीं बङ्गाक्षरमुद्रितत्वेन 'मदिरौ मत्तखञ्जनौ' इति मिश्रकोशं नाम कञ्चन शरणयन्ति। तत्स्वरूपं विचार्य पश्चादवधारयिष्यामः। सताऽप्यनेन कोशेन 'मदिरौ मत्तखञ्जनौ' इत्येवंरूपेण भाव्यमिति भाति। तदस्तु। अत्यन्तार्वाचीनशब्दकल्पद्रुमवाचस्पत्याद्यविदितत्वात् अर्वाचीनतरेण केनचित् पुंपक्षिवाचिना शब्देन पुंलिङ्गेनैव भाव्यमिति अभिमन्यमानेन एवमेतत कल्पितमिति स्फुटमेव प्रतीयते।

यदुच्यते 'खञ्जनाङ्गना मदिरा, खञ्जनः पुमांस्तु मदिर इत्यास्थेयम्' इति तत् किं वयं शब्दानामनुशासितारः येन अस्मादिच्छानुसारेण किञ्चिद् ब्रूयाम। स्त्रीलिङ्गेन पुंवाचितया पठन्ति। तथैवास्माभिर्ग्राह्यम्। मत्तखञ्जन इति जातिपरतामाश्रित्य मदिरापदं खञ्जनस्त्रियमप्यभिदधातीति काममुच्यताम्। पक्षिवाचितया पुंलिङ्गपदकल्पने तु किं प्रमाणम्।

* 'सोऽयं कोशत्वेनैव न प्रमाणम्' इति। अत्र वेदान्तकौस्तुभे श्रीमत्परवस्तु-वेदान्तदेशिकस्वामिभिर्यदुक्तं तत् तथैव यावदुपयुक्तं लिख्यते—

न हि भट्टहलायुधामरसिंह .... ....।यनेकपण्डितविरचितानां अभिधानरत्नमाला-नामलिङ्गानुशासना .... घभिधानकोशानां श्रुतिवत् स्वतःप्रामाण्यमायुष्मतोऽभीष्टम्। तेषां प्रचुरप्रयोगमूलत्वात्। 'नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः। भूरि-

प्रयोगा ये येषु ....।।' इत्यादिनाऽमरसिंहहलायुधादिभिरेव स्वविरचिताभिधानकोशानां प्रयोगमूलत्वस्फुटीकरणात् । .... अभिधानकोशस्मृतिष्वपि अवाचकानुशासनस्य सहस्रश उपलम्भात् । तथा हि—अमरकोशे तावत् 'अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः' इत्यवदातशब्दः श्वेतवर्णवाचित्वेनानुशिष्टः । न चावदातशब्दः श्वैत्यवाची । 'अवदातायां तु ङीप् प्रसज्येत । अवदाता ब्राह्मणी । वर्णादनुदात्तादिति । नैष वर्णवाची । किं तर्हि । विशुद्धवाची । अतश्च विशुद्धवाची । एवं ह्याह—'त्रीणि यस्यावदातानि ....' इति महाभाष्ये वर्णविशेषवाचित्वनिराकरणात् । तथा 'पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी । भार्या जाया' इति पत्नीशब्दो भार्यापर्यायतयाऽनुशिष्टः । न च पत्नीशब्दो भार्यापर्यायः । 'पत्युर्नो यज्ञसंयोगे' इति सूत्रभाष्ये 'कथं तर्हि वृषलस्य पत्नीति । उपमानाद् भविष्यति पत्नीवत् पत्नी'ति तस्य भार्यापर्यायत्वनिराकरणात् । तथा 'ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने' इति धाय्याशब्दः सामिधेनीपर्यायतयाऽनुशिष्टः । न चासौ तत्पर्यायः । 'द्यावापृथिव्योः ....' इति पञ्चमाधिकरणे तस्य सामिधेनीसामान्यवाचित्वनिरसनपूर्वकं तद्विशेषपृथुपाजवत्याद्यृग्विशेषवाचित्वव्यवस्थापनात् । इति दिक् । तथा हलायुधविरचितायाम् .... । तथा वैजयन्त्यादिष्वपि .... । अतोऽभिधानकोशस्मृतीनां प्रचुरप्रयोगज्ञापनमात्रेणान्यथासिद्धानां अनन्यथासिद्धत्ववर्णनं कुदृष्टीनां दुरभिमानमात्रमूलमिति पश्यन्तु सन्तः ।'

इति तत्रोक्तम् ।

* 'मीमांसाभाष्यानुरोधेन अनादरणीयत्वस्थिते'रिति । अत्र शिवार्कमणिदीपिकायां अप्पय्यदीक्षितेन

> नन्वमरकोशे पुण्डरीकं सिताम्भोजमित्यनुशिष्टम् । तत्र कथं कप्या-सविशेषणेनोपनीतं लौहित्यमन्वेतु । सत्यम् । तदनुशासनं नाभि-युक्तसम्मतम् । यतः शबरस्वामिना ··· रक्तपद्मं हि तद्व्यमित्युक्तम् । वाक्यकारेणाप्यत्रैव विषयवाक्ये .... । न चैतावदभियुक्तविरोधे कातिपयकाव्यप्रयोगमात्रदर्शिनः कोशकारस्य वचनं स्वार्थव्यवस्थापने प्रभवति ।

इति यदुक्तं तदनुसन्धेयम् ।

अमरसिंहोक्तं सिताम्भोजार्थत्वं प्रमाणीकृत्य भगवतः पुण्डरीकाक्षत्वं कथमुपपादनीयमित्यत्र सितत्वरूपविशेषणांशं परित्यज्येति यदि केचिदुपपादयन्ति तावता प्रकृतस्य किमायातम् । अमरसिंहोक्तिः प्रमाणमप्रमाणं वेति हि संप्रति विचारः । तत्र शास्त्रकारस्य वैदिकशब्दार्थनिश्चयेऽभियुक्ततरस्य शबरस्वामिनो वचनं प्रमाणीकृत्य कोशो बाध्यते । तत्र का वाच्यता । ये क्लेशेन पुण्डरीकाक्षत्वं भगवति उपपादयन्ति ते स्वरसेनारुणाम्बुजरूपेणार्थेन प्रामाणिकेन हृष्टतरा हि भवेयुः ।

* 'सुरायामेव इमं शब्दं क्लीबं केचिदिच्छन्ती'ति । उणादिवृत्तिकाराः ।

* 'तदभिप्रायेणैव नाट्यकलाकोविदेन कालिदासेन मदिरेक्षणेत्यादि प्रयुक्त'मिति । एतदर्थप्रतिपत्त्यनन्तरं अर्थान्तरं वक्तुं सहृदयः कश्चिन्नैव प्रवर्त्स्यति । शब्दनयेन अर्थनयेन चास्यैव इतरापेक्षया ज्यायस्त्वात् । खञ्जन एव तावत् पूर्वपदस्यार्थ इति क्रियताम् । अस्योपमानत्वात् पदयोः सामानाधिकरण्यनिर्वाहाय सदृशलक्षणा आश्रयणीया । पक्षान्तरे तु मदिरार्थस्य ईक्षणविशेषणत्वात् स्वत एव सामानाधिकरण्यात् न लक्षणाप्रसङ्ग इति शब्दनयः । उपमाप्रतीत्यनन्तरं रम्यत्वादिप्रतीतिद्वारा रसपरिपोषस्तस्मिन् पक्षे । पक्षान्तरे तु अवस्थाविशेषप्रतिपत्त्या साक्षादेवेति अर्थनयः । एव-

मपि तमर्थमप्रतिपन्नं कृत्वा विचारे मदिरशब्दो मत्तार्थो विशेष्यनिघ्न इत्याश्रयणे न सङ्कटं किञ्चित् । यत्र सन्धिविशेषेण ह्रस्वान्तत्वं नास्ति तत्र सुरा इति छित्वा सुरावत् मनोहरे ईक्षणे यस्या इति यदर्थ उच्यते तत्र 'अस्मभ्यं न रोचते' इत्येतद् विना नान्यत् किमपि वक्तुं शक्यते । शब्दतोऽर्थतो वा दोषगन्धविरहात् । मदिरलोचना इति ह्रस्वान्तत्वे तु विशेष्यनिघ्नत्वं वा क्लीबस्यापि सुरावाचित्वं वा अभ्युपेत्य अर्थवर्णनं शक्यमिति नातीव सङ्कटम् ।

खञ्जनार्थवादे तु न कथमप्युपपत्तिः । शब्दरत्नावल्याः प्रमाणत्वे स्त्रीलिङ्गस्यैव पक्षिवाचित्वम् । तत्तु नाभ्युपगतम् । पक्षिवाचिनः पुंलिङ्गशब्दस्य सत्त्वे न किमपि प्रमाणम् ।

अस्यां स्थितौ मिश्रकोशः कश्चन प्रादुर्भवति । अयं भ्रान्तिमिश्रकोश एवेत्यत्र नास्माकं संशयः । अथापि स्थित्वा पश्येम ।

---

# भोग्यशब्दार्थः ॥

(V. R. Srinivasa Tatacharya Siromani)

विषयोऽयं पूर्वसञ्चिकायां प्राकाश्यत । तत्रानुक्तोऽवश्यवक्तव्यस्तदनुबन्धी विषयः संक्षेपेण निवेद्यते । श्वेताश्वतरे भक्ष्यांशे भोग्यशब्दप्रयोगश्छान्दसत्वेन छत्रिन्यायेन वा 'देहार्थं भोग्यनीये'-त्यादौ तु तत्र तत्प्रयोगः तन्न्यायेनोपपद्यत इति तत्र न्यरूप्यत । भक्ष्यत्वाभिमते पदार्थे अभ्यवहार्यत्वमुपभोग्यत्वं चेत्याकारद्वयं विद्यते । तत्राभ्यवहार्यत्वपुरस्कारेण तु भोज्यशब्दस्य साधुत्वं भक्ष्यशब्दघटितेन 'भोज्यं भक्ष्ये' इति पाणिनिसूत्रेणोक्तमवगम्यते ।

उपभोग्यत्वपुरस्कारेण तु अभक्ष्य इव भक्ष्ये भोग्यशब्दप्रयोगो न सूत्रकृदसंमतः । श्वेताश्वतरेऽप्यत्र चाचित्सामान्ये उपभोग्यत्वपुरस्कारेण प्रयुक्तो भोग्यशब्दः छान्दसत्वं छात्रनीतिं वा विनाऽपि स्वरसतरः सङ्गच्छत इति यद्यपि वदितुं शक्यते । तथाऽपि भक्ष्ये भोज्यशब्दस्य निपातनेन काशिकायां 'भक्ष्य इति किं भोग्यः कम्बलः' इति प्रत्युदाहरणदानेन भोग्य ओदनः इत्याद्यकथनेन चाभ्यवहार्यें भोग्यशब्दप्रयोगः उपभोग्यत्वाकारेणाप्ययुक्त इव भाति । अत्र सहृदयाः प्रमाणम् ।

वाचस्पत्यादौ तु भोग्यशब्दः प्रकृत-ण्यद्रूपकृत्प्रत्ययान्त इव तदर्हतीत्यर्थकयद्रूपतद्धितान्तोऽपि प्रादर्श्यत । तद्धितयत्प्रत्ययस्तु 'छन्दसि च'त्यनेन प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्यस्मिन्नर्थे यत्प्रत्ययो भवतीत्यर्थकेन व्यधीयत । अनेन सूत्रेण भोगं लब्धुं योग्यं भवतीत्यर्थे भोगशब्दाद्यत्प्रत्यये भोग्यमिति रूपं सिद्ध्यति । अस्य भक्ष्येऽभक्ष्ये चाचेतने चेतने च प्रयोगो घटत एव । नायं न्यायलब्धारमपेक्षते । परं त्विदं छान्दसं रूपम् । श्वेताश्वतरे तत्प्रयोगस्य सामञ्जस्येऽपि भाषायां तत्प्रयोगः कथमुपपद्यत इति शङ्काऽवतरति । अयमत्र समाधिः । 'वयस्यासु मूर्ध्नो मतुबि'त्यत्र छान्दसवयस्याशब्दप्रयोगेण छान्दसानामपि भाषायां क्वचित्प्रयोगो भवतीत्यर्थः शब्दकौस्तुभादौ अज्ञाप्यत । 'सेनान्यमुशन्ति देवाः' 'त्वां सर्वकारणमुशन्त्यनपायवाचः' 'तं तस्थिवांसं' 'आतस्थिवान् मन्त्रमयं शरीरम्' इत्यादिमहाकविसूक्तिषु छान्दसस्य वशधातुक्वसुप्रत्ययादेः प्रयोगो दृश्यते । अतस्तद्धितान्तभोग्यशब्दस्य छान्दसस्य भाषायां प्रयोगो नासमञ्जसः ।

दिगादेराकृतिगणत्वमाश्रित्य 'दिगादिभ्यो यत्' इति सूत्रेण वास्तुनि भव इत्यर्थे वास्तव्यशब्दवत् भोगे भव (विषयतया विद्यमानः) इत्यर्थे भोगशब्दात्तद्धितयत्प्रत्ययेन भोग्यशब्दस्य साधने तु छन्दसि भाषायां चोपलभ्यमाने भोग्यशब्दे न कस्यापि चोद्यस्यावकाशः । तत्तत्प्रत्ययनिबन्धनं शब्दबोधवैलक्षण्यं तु विवक्षितार्थे भोग्यशब्दस्य साधुत्वं न प्रतिबध्नाति ।

---

# प्रकीर्णकम् ॥

I

वृद्धा—गच्छत रे । वृथा जल्पन्तः उपद्रवथ । किं युष्माकं किमपि कार्यं नास्ति । प्रातरुत्थाय आगच्छथ दश विंशतिरिति मिलिताः । अस्मद्-गृहवेद्यां गच्छन्तं कालमप्यजानन्तः चर्चां वादं कलहं क्रीडां सर्वं कुरुथ। कर्णौ बधिरायेते भवतामाक्रोशेन अविच्छिन्नेन घोषेण । लिप्ता रङ्ग-वल्लीभिरलङ्कृता वेदिः ध्वस्ता भवति । गृहान्तरं कस्मान्न गच्छथ । इहैव आगत्य कस्मात् हिंसां कुरुथ । ....

बालाः—पाट्टि मा कुप्य । त्वदीयं गृहं रमणीयं वर्तते । न किमपि गृहान्तरमेवं रम्यम् । भोजनकालं विना अत्रैव वयं स्थास्यामः । त्वदीयं गृहं तथैव भविष्यति । न विनङ्क्ष्यति ... । प्रतिदिनं सर्वदा इहैव भविष्यामः । प्रहृता अपि नापगमिष्यामः ।

II

वृद्धा—अये बालकाः, सर्वे समर्था गुणशालिनः मयि प्रीतिमन्तो यूयम् । इह आतपे शोषणाय धान्यमाधास्यामि । इहैव हि यूयं वर्तध्वे । जाग्रतो वीक्षध्वम् यथा न कश्चिदपहरति न गावो भक्षयन्ति । ममा-न्तर्गृहे किञ्चित् कार्यमस्ति । तदहं पश्यामि ।

—पाट्टि, मम बहु पठितव्यमस्ति । त्वरया गन्तव्यम् ।

—चिरमासीदिति ममाम्बा कुप्येत् । किं कुर्यां पाट्टि ।

—कर्मकरमाह्वयति पिता मां प्रैषिषत् । अतः पाट्टि मया स्थातुं न शक्यते ।

—उदरशूलं बाधते पाट्टि ! नदीतीरं गन्तव्यम् । अन्यथा किं न वर्तेय ।

—अहो वीक्षस्व पाहि, मम भ्राता त्वरितमागच्छेत्यामिति मामाह्वयति ।

— ...

—रे त्वमेकोऽवशिष्यसे । मान्यं वीक्षस्व रे । वृद्धाया उपकारं कुरु । मम कार्यमस्ति ।

—असह्या पिपासा ; जिह्वा शुष्यति । श्वः कलाशाला ; गणितं सामिकृतम् । वस्त्रं जले सिक्त्वा शिलायां न्यधाम् । शोधनीयम् ।

वृद्धा—पश्याम्ब बालकान् । श्वः प्रभृति इह आगच्छत, ब्रवीमि ।

---

# पुस्तकपरामर्शः ॥

तन्त्रसिद्धान्तरत्नावलिः । [पूर्वमीमांसाप्रकरणग्रन्थः]

श्रीकाशीहिन्दुविश्वविद्यालयधर्मविज्ञानविद्यालयाध्यक्षमहामहोपाध्याय-शास्त्ररत्नाकर-मीमांसाकेसरि-पण्डितसार्वभौम पं. अ. चिन्नस्वामिशास्त्रिमहोदयैः विरचिता टिप्पण्या संयोजिता च । काशीहिन्दुविश्वविद्यालयपूर्वमीमांसाध्यापकेन मीमांसान्यायसाहित्याचार्येण पं. श्रीपट्टाभिरामशास्त्रिणा परिशिष्टेन संयोज्य संशोधिता । साधारणसम्पादनस्य मूल्यं ३—०—० । विशिष्टस्य ४—०—० ।

मीमांसाशास्त्रे द्वादशस्वध्यायेषु निरूपितानां प्रधानार्थानामत्र संग्रहः व्युत्पित्सुजनोपकारोचितया प्रक्रियया कृत इति नैतावन्मात्रम् अपि तु प्रकरणग्रन्थान्तरेषु कुत्रापि अस्पृष्टायाः मीमांसकसम्मतायाः प्रमाणप्रमेयस्थितेरपि अत्र व्युत्पादनमस्तीति महान् विशेषः । सरलया शैल्या विद्यार्थिजनहृदयङ्गमं लेखने प्रसिद्धा इमे महामहोपाध्यायशास्त्रिचरणा इति एतत्कर्तृकतयैव व्याख्यातगौरवं इमं ग्रन्थं प्रति न वयं विस्तरेण किमपि वक्तव्यं पश्यामः ।

---

SANSKRIT VIDYA PEETHA TIRUPATI

Registered No. M 2300.

33

Book XVIII ॥ श्रीः ॥ Nos. 9, 10, 11, 12.

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. १८. [ कालि ५०४६ { पार्थिव वृषभ कर्कट-साधारण सं ९, ११
मिथुन सिंह-शास्त्रानुबन्धः १०, १२

# The UDYANA PATRIKA.

A

SANSKRIT MONTHLY

May, July, June, August } 1945

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* D. T. Tatacharya Siromani M. O. L.,
Lecturer, Sri Venkateswara College,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः—


कुवलयानन्दः । [बुधरञ्जनीसमेतः] १३३—१४०

1 मेनका ।
2 सुभाषितनीवी ।
3 अभिधेयविशेषः ।
4 मदिरेक्षणा । (3)
5 छन्दोभङ्गपरिहारः ।
6 संस्कृतप्रचारिणी सभा ।
7 जितं त्रिशङ्कुना ।

नवनवानि भेषजानि सज्जानि कारयित्वा बहुधा प्रायोजयताम् । श्यामार्यपेरुन्देव्यम्बाप्रभृतिभिः कैश्चिदपि चतुःपञ्चान्यहानि तत्र नागन्तव्यमिति आज्ञामकुरुताम् । सा भयङ्करी दशा सप्ताष्टदिनावधि अनुबद्धा आसीत् । निरन्तरप्रयुक्तानि वीर्यवन्ति भेषजानि तदीयान् व्रणान् अल्पमल्पं संरोपमयासुः । शरीरे सर्वथा स्तब्धं रुधिरोत्सं च पुनः प्रावर्तयन् । विशीर्णा बुद्धिः प्रज्ञा च मनाक् सामीचीन्यमभजताम् । स च स्वस्मृतिं प्राप्य चक्षुषी उन्मील्य चत्वारि पार्श्वानि व्यलोकयत् । वैद्युतदीपप्रकाशः 'फलिच्' इति स्फुरित्वा चक्षुरभिभवति स्म । तदसहमाने तदीये नेत्रे श्रान्ते सपदि मुकुलीबभूवतुः । रुग्णः सन् कस्मिंश्चिदन्तर्गृहे खट्वायां शयितोऽहमस्मीति स मेने । तथा कश्चित् कालोऽगच्छत् । स्वस्मृतिस्तदानीं सम्यगजायत । यत् स्वयं समुद्रतीरे मेनकां हन्तुमयतत, यच्च स्वयं तदा अधः पतितः मोटारशकटेन प्रेषणं प्राप, तत् स्मृतिपथमगच्छत् । स्वखट्वासमीपे या काचिदुपविष्टेति, बहूनि दिनानि समीपे स्थिता स्वस्य प्रीतिमुपजनयन्ती वर्तत इति च तस्य मनसि स्वप्नकल्पा काऽपि धीरुदभवत् । का नाम तादृशी महोपकारिणीति जिज्ञासमानः सः स्वनेत्रे पुनः सकृदुन्मील्य तदधिष्ठितां दिशमैक्षत । खट्वां समया स्थापितायां चतुष्पद्यां कस्याञ्चित् उष्णीषादिधारिणीं रम्यां काञ्चन श्वेतकन्यामणिं चिन्ताभराक्रान्तेन मुखेन उपविष्टामपश्यत् । स्वमनसि उत्थितमभिलाषं यावत् स न प्रकाशयत् तावदेव स्वज्ञानदृष्ट्यां तं विज्ञाय तदभिलषितकरणे सज्जा सा ददृशे । तदीयं वदनं निष्कपटं नितान्तसंवननं चादृश्यत । अथापि बहुदिनं अहोरात्रं सन्निधानात् तस्या वदनं म्लानमिव अभात् । आत्मानं निर्वर्णितवन्तं तमालोक्य सा कन्यामणिः झटित्युत्थाय खट्वां समया उपसृत्य 'किमपेक्षितम्' इति प्रीत्या पप्रच्छ । तस्या ध्वनिः अमृतस्रुतिवत् कर्णयोर्माधुर्यास्वादं सम्पादयामास । वराहस्वामी सपदि स्वनयने निमीलयामास । लोके स्थिताः सर्वा वनिताः पातिव्रत्येन सर्वथा रहिता वञ्चनशीला इति मत्वा जुगुप्समानः सः तस्या अपि मुखे दृष्टिपातनं पापमिति


SANSKRIT VIDYA... TIRUPATI

दृढाऽध्यवसायोऽभवत् । तस्मात् स्वसमीपे स्थितां पूर्णचन्द्रोदयदर्शनीयां सर्वाङ्गसुन्दरीं मृत्योरपि घोरतरां मन्यमानः स्वनेत्रे गाढं न्यमीलयत् । अपि च भारतवनितापेक्षया यूरोपवनितासु अधिकतरद्वेषवान् आसीत् । यतः ताः लज्जा सङ्कोचः भयमिति स्त्रीगुणान् सर्वान् परित्यज्य पुरुषैस्समवेताः अस्मद्देशस्त्रीणां दुराचारेषु स्पृहामुत्पादयन्तीति मेने । विषादपि क्रूरतराः श्वेतनार्य इति ताःप्रति अत्यन्तं द्वेषं चकार । अतः तस्याः प्रेमपूर्णः प्रश्नः तस्य मनसः शान्तिं विनाश्य रुजमकरोत् । पुनरपि श्रान्तः सः निमीलितनयनः व्यश्राम्यत् । सन्निहिता श्वेतरूपधारिणी श्वेतमुग्धहंसी तूलादपि कुसुमदलादपि म्रदीयसा स्वकरेण तदीयललाटकपोलादीनि आममर्श । सन्तप्तस्य वक्षसि कृतं कर्पूरकुङ्कुमहिमोदकमिश्रचन्दनविलेपनमिव तत् परिमर्शनं यद्यपि तमानन्दसागरे न्यमज्जयत् ; देवगीतमधुरः तदीयध्वनिरेव मन्त्रोच्चाटनवत् यद्यपि तस्य रुजं व्यद्रावयत ; तथाऽपि तस्य मनःपरमतीवातुरभावमभजत् । "यत्र क्वापि गतमपि खलु नारीपीडाः 'मनुष्यान् न मोक्ष्यामि' इत्यनुद्रवन्ति । एताभ्यो भीत्वा यमलोकमुपधाव्य निलीनानपि न परित्यक्ष्यन्ति इतीव किल भाति । छे छे । को लोकः । वैद्यशालायामपि नु एताभिः सह स्थित्वा रोदितव्यम् । कुतो नाम पुमांसोऽत्र न नियुज्यन्ते । एते श्वेताः खलु निकामं कामातुराः । स्त्रीपित्तातुराः । इत्थं रुग्णानां समीपे युवतयः स्थापिताश्चेत् , तेषां दौर्बल्यदशायां तन्मनसि स्त्रीचापलोद्भवे तेषां रोगः किं वर्धेत अथ वा ह्रसेत् । पुरुषकृताभ्यः शुश्रूषाभ्यः स्त्रीकृताः शुश्रूषाः यद्यपि श्रेयस्यः तथाऽपि आभिर्जायमानोऽनर्थो महत्तर इत्येतत् कथमेषामाङ्गलभिषजामविदितमभूत् । रुग्णेषु यथा तथा नश्यत्सु किं तेषां भवति । उद्यानस्थलेष्वपि स्त्रीणां पुरस्तादवस्थितिस्तेषां सुखाय भवति । तावदेव तेषां प्रार्थितम् । अस्याः श्वेतकन्याया धार्ष्ट्यं वाचाटत्वं च किमिति कथनीयम् । मया अस्या दर्शनानुपदं 'किमपेक्षितम्' इत्यनया पृष्टं कामं न्याय्यम् । ततःपरं मम चक्षुषोर्निमीलनं दृष्ट्वा यदियं मम ललाटं कपोलौ च परिममर्श तत्र किं कारणम् । तया कर्त-

आसन् अपरपीडार्थमिति पदच्छेदः । लोके हि स्नेहशैत्यादिकं सर्वत्र जायते । नृशंसस्य तु एते अपरपीडार्थमेवासन्नित्यन्वयात् दूरस्थजनबाधाऽपि न परिहीयत इति बोध्यम् । तथा च नास्य स्नेहादिकमन्वीक्ष्य भ्रमितव्यम् । किन्तु सुदूरमपसर्तव्यं बुद्धिमद्भिरिति ध्येयम् । अथ वा अनादिसुस्निग्धेऽपि जने खलानां क्रमेण स्नेहादिहानिः अपराधप्रवृत्तिश्च जायत इति । शब्दार्थश्च कोश इवाचरति कोशतीति विग्रहात् मुकुळीभवतीत्यर्थः । तथा च पूर्वस्नेहस्तन्मूलकशैत्यादिकं च कोशति सङ्कुचति आगश्च जायते । सर्वेऽप्येते परहिंसार्थमेवेति । तथा च सुस्निग्धजनेऽप्यस्यापराधप्रवृत्तिरेवान्ततः परं तु विळम्बाविळम्बमात्रमेव भेद इति । तथा ह्युक्तं 'मुखं पद्मदळाकारं वाक्च चन्दनशीतळा । हृदयं विषसंयुक्तमेतद्धूर्तस्य लक्षणम् ॥' इति ।

अन्योऽपि खड्गविषयतयाऽर्थबोधः । असिता असित्वं, आत्मा स्वभावः, 'स्वभावे परमात्मनि' इति वैजयन्ती । यस्य तस्य खड्गत्वरूपसाधारणधर्माक्रान्तस्येत्यर्थः । निस्त्रिंशस्य स्नुहीदळसदृशातिदीर्घखड्गविशेषस्य, 'स्नुहीदळाभो निस्त्रिंश' इति वैजयन्ती । निर्गतस्त्रिंशद्भ्यो (तो?) ऽङ्गुळिभ्य इति निस्त्रिंशः त्रिंशदङ्गुळ्यभ्यधिकदीर्घखड्गः । ततोऽवरस्तु छुरिकादिः । असित्वं च उभयसाधारणम् । तथा चासित्वमात्रमेव भयहेतुः तत्राप्यसौ भयातिशयजनक इत्यर्थः । आसन्नपरपीडार्थं आसन्ना या परपीडा-शत्रुयुद्धादिः तदर्थं तत्समय इत्यर्थः । स्नेहः तैलनिषेचनं, शैत्यं शितस्य भावः, तीक्ष्णधारीकरणं प्रसादश्च मुखप्रतिफलनानुगुणफाळफळ्यविशेषः । कोशत्यागश्च अपिधानकोशाद्बहिर्भावश्च जायते । युद्धसमय एव खड्गं तैलादिभिः सेचयन्ति शातयन्ति चेति प्रसिद्धमेव लोके ।

अपरोऽपि श्रीशठकोपमुनिविषयकः । असितात्मनः अबद्धस्वरूपस्य । षीञ् बन्धन इति धातोर्निष्ठायां सितशब्दो बद्धार्थकः । शठकोपमुनिस्तु न कर्मबद्धः । जन्मकाल एव शठवायुनिर्धूननात् । निस्त्रिंशस्य परनिरस-

नानुकूलायुधविशेषरूपस्य, अत एव पराङ्कुश इति नामास्य विश्रूयते । स्नेहः भगवद्विषये अत्यन्तानुरागविशेषः, नायिकाप्रणयादिभावो वा । शैत्यं शार्ङ्गपाणिदशकप्रथमगाथोक्तरीत्या जलमयीभूय द्रवणम् । प्रसादश्च पदे पदे भगवत्संश्लेषानुभवात् सुप्रसन्नत्वम् । तच्च प्रसिद्धं सन्तुष्टिगाथासु । कोशत्यागश्च चरमशतकोक्तक्रमेणाण्डकोशान्निष्क्रमणं च । यद्वा—अन्नमयप्राणमयादिपञ्चकोशपरिहरणम्, जायते । किमर्थं आसन्नः स्वहृदयाधिष्ठितो यः परमात्मा तस्य पीडा निर्बन्धः तेन । शास्त्रनिर्बन्धाय कर्म करोतीतिवत् हेतोरुद्देश्यताविवक्षा । स्वप्रयत्नमन्तरेण सर्वं परमात्मनिर्बन्धेनैव भवतीति श्रुतमेव चरमशतके । यद्वा पीडा दृढसंश्लेषः । पाणिपीडनविधिं अन्योन्यसम्पीडनमित्यादौ तदर्थबोधात् । अथवा आसन्नाः आश्रिताः ये परे मधुरकविप्रभृतयः तेषां पीडायै स्ववियोगदुःखदानाय । असकृत् परोपदेशार्थगाथोद्गिरणात् समीपस्थानामयत्नतः समुत्तारो भवेत् । तद्वियोगे च पीडैव फलिष्यतीति भावः ।

अन्योऽपि यथाश्रुतग्राहिज्यौतिषिकपरः । निस्त्रिंशस्य त्रिंशांशादिसूक्ष्मभागज्ञानरहितस्य, असितात्मनः आवापोद्वापाद्यशक्ततया कलुषितमनस्कस्य । राशिचक्रमात्रावलोकनेन स्थूलतया फलादिकं ब्रुवाणस्येति यावत् । स्नेहः सर्वत्रापि शुभफलोद्घोषणेनानुरागः, शैत्यं समीचीनमिदं जातकमित्यादि सुस्निग्धवाक्यप्रयोगः, प्रसादः तदुचिताकारणहासादिकं, कोशत्यागः पुस्तकाद्युद्घाटन लिखितजातकादिकोशदानं वा, जायते सर्वमिदमासन्नपरपीडार्थं सन्निहितजनबाधार्थमेव भवति । उच्यते हि—'ज्योतिश्शास्त्रमहादधौ बहुविधोत्सर्गापवादात्मभिः कल्लोलैर्निबिडे कणान् कतिपयान् लब्ध्वा कृतार्था इव । दीर्घायुःसुतसम्पदादिकथनैर्दैवज्ञपाशा इमे गेहं गेहमनुप्रविश्य धनिनां मोहं मुहुः कुर्वते ॥' इति । कथाऽपि काचित् श्रूयते—ज्यौतिषिकः कश्चित् कस्यचिद्धनिकस्य पुत्रोत्पत्तिं श्रुत्वा तत्कालफलादिकं

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्बेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. १८] { कलि ५०४६ पार्थिव { वृषभ-मिथुन-कर्कट-सिंह } सं ९,१०,११,१२

## अभिधेयविशेषः ॥

### ५. सम्प्रति ॥

'एतर्हि संप्रतीदानीमधुना साम्प्रतं तथा' इत्यमरसिंहः सम्प्रतिशब्दं इदानीमित्येतत्पर्यायेषु पठति । अयमर्थः शाबरे शब्दानित्यत्वाधिकरणे

> प्राङ्मुखो देवदत्तः पूर्वाह्णे सम्प्रति पुरस्तादादित्यं पश्यति । तस्य दक्षिणतोऽवस्थितो न द्रौ पश्यति—आत्मनश्च सम्प्रति स्थितम् । तिरश्चीनं (च) देवदत्तस्यार्जवे ।

इत्यत्र न सङ्गच्छते । 'इदानीं पुरस्तात्पश्यति' 'आत्मनश्च इदानीं स्थितम्' इति ह्यनन्वितम् । तस्मादर्थान्तरमिह विवक्षितमिति प्रतीयते । किं तदर्थान्तरमिति 'अ सांप्रतिके' इति सूत्रपदमञ्जरीपर्यालोचनयाऽवगन्तुं शक्यते । तत्र हरदत्त इदमाह—

> सम्प्रतिशब्द इदानीमित्यर्थे प्रसिद्धोऽपि न्याय्येऽपि वर्तते । दृश्यते हि "अनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष सम्प्रति यज्ञो यत्पञ्चरात्रः" इति । न न्यूनो नातिरिक्तः सम इत्यर्थः । स च प्रज्ञादौ पठ्यते । तेन साम्प्रतं सम्प्रतीति च पर्यायौ ।

इति । न्याय्यमिति प्रथममुक्तं अन्यूनानतिरिक्तमिति पश्चादयं विवृणोति ।

'दृश्यते हि' इत्युपक्रम्यानेन उदाहृतं तैत्तिरीयसंहितावाक्यम् । (तस्य शेषः 'य एवं विद्वान् पञ्चरात्रेण यजते सम्प्रत्येव यज्ञेन यजते' इति) । अत्र सायणस्य भाष्यम्–'एष पञ्चरात्रः सम्प्रति समीचीनः न्यूनातिरेकाभावेन योग्यः' इति । भट्टभास्करस्य –"सम्प्रति यज्ञः अन्यूनानतिरिक्तपाङ्क्तस्वरूपवान् यज्ञः । प्रतिपत्त्या सङ्गतं सम्प्रति * । तिष्ठद्गुप्रभृतित्वादव्ययीभावः § ।" इति । "उत्कर्षापकर्षहीनो मध्यो वैयाकरणः । मध्यं दारु । नातिह्रस्वं नातिदीर्घमित्यर्थः ।" इति भट्टोजिदीक्षितस्य साम्प्रतिकपदार्थविवरणम् । एवं च समभिव्याहृतपदाभिहितस्य अर्थस्य यथाकथञ्चिदप्यन्यथाभावं विना साक्षात् तद्रूपत्वं यत् तत् सम्प्रतिशब्दवाच्यमिति निश्चेतुं शक्यम् । अस्मिन्नर्थे शाबरे सम्प्रतिशब्दः सुसङ्गतो भवति । न मनाग् दक्षिणतः न मनागुत्तरतः अपि तु साक्षात् पुरस्तात्, प्राच्यां दिशीति । एवं 'अथ यत् संप्रति मध्यन्दिने स उद्गीथः' इति छान्दोग्ये सामोपासनप्रकरणगतवाक्येऽपि 'नेषदपि पूर्वं न पश्चात् । अपि तु साक्षान्मध्यन्दिने' इत्यर्थः । ऋजुमध्यन्दिन इति भाष्यकाराः । तस्याप्ययमेवार्थ इति द्रष्टव्यम् । एवं 'उद्दालको ह वै भगवन्तोऽयमारुणिः सम्प्रतीममात्मानं वैश्वानरमध्येति' 'आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि' इत्यादिवैश्वानरविद्यावाक्येष्वपि योजनीयम् ।

## ६. सम्भवः ॥

सम्भवशब्द इदानीमुत्पत्तौ प्रसिद्धः । अस्थिसम्भवा पद्मसम्भव इति । प्राप्तियोग्यत्वे च । न हि शशशृङ्गं नाम सम्भवतीति । अनयोर्द्वयोरर्थयोरन्यतरोऽपि

---

* 'सङ्गतं प्रतिगतस्य' इति तिष्ठद्गुसूत्रे पदमञ्जरी ।

§ 'सम्प्रतीति प्रादिसमुदायरूपः शब्दः' इति गणरत्नमहोदधौ वर्धमानः । 'सं प्रति एतयोः समाहारद्वन्द्वः' इति भानुजिदीक्षितप्रभृतयः ।

ता अब्रुवन् वरं वृणामहा ऋत्वियात् प्रजां विन्दामहै काममाविजनितोः सम्भवामेति तस्मादृत्वियात् स्त्रियः प्रजां विन्दन्ते काममाविजनितोः सम्भवन्ति ।

इत्यस्मिन् तैत्तिरीयसंहिताप्रकरणे न घटते । "ऋत्वियात् ऋतुसम्बन्धाद् वीर्यात् प्रथमसम्भोगादेव गर्भे जातेऽपि काममुद्दिश्य आ विजनितोः आ प्रसवात् पुरुषेण सङ्गच्छेमहि ।" इति हि तत्र भाष्यम् । अयं 'सङ्गमः' 'संसर्गः' इत्येवंरूपोऽर्थः समित्युपसर्गार्थपर्यालोचनया सुलभः । एकमिति तावत् तस्यार्थः । 'प्रेताभ्यां समर्थाभ्यां' 'एकाभ्यां समर्थाभ्यां' 'व्यवहरणोः समर्थयोः' इति हि पाणिनिः एकार्थाभ्याम् एकार्थयोरित्यर्थे समर्थपदं व्यवहरति । तेन तमेवार्थं कृत्वा एकीभवति संयुज्यते इत्येतदर्थप्रत्यायनाय सम्भवतीति व्यवहारो युक्त एवेति । यदिदं संशब्दवाच्यमेकत्वं तदनेकविधम् । तत्र पृथक् स्थितयोः संश्लिष्टत्वरूपं यदेकत्वं तदिदानीमुक्तम् । अविभागेन स्थितस्य विभक्तत्वं पृथक्त्वरूपमपरमेकत्वम् । अस्मिन्नर्थे—

प्रजापतिः प्रजाः सृष्ट्वा प्रेणानुप्राविशत् । ताभ्यः पुनः सम्भवितुं नाशक्नोत् ।

इति तैत्तिरीये अश्वमेधब्राह्मणे सम्भवतिर्दृश्यते । ताभ्य इति पञ्चमीश्रवणेन हि सम्भवितुमित्यस्य पृथग्भवितुमित्यर्थोऽवश्यं वाच्यः ।[1] एवं पृथग्भवनमुत्पत्तिरूपं भवितुमर्हति । कार्यस्य वस्तुन उत्पत्तिर्हि नाम उपादानकारणात् पृथग्भाव एव । तथा च सम्भवपदस्य उत्पत्तिवाचित्वमपि सम्पन्नम् ।

एकदेशकालवृत्तित्वरूपमन्यदेकत्वम् । तथा हि नवमे एकधाधि-

---

१ 'प्रजासु क्षिप्तस्य आत्मीयेन रूपेण संहत्यावस्थानं(?) सम्भवः । पृथक्त्वम्' इति भट्टभास्करस्य भाष्यम् । 'प्रजाभ्यः सम्भवितुं स्वेन रूपेणाविर्भवितुमशक्तः सन्' इति सायणस्य ।

करणे ऐक्यस्वरूपं विमृशन्तो मीमांसका वदन्ति—'किं तत्र ऐक्यम् । एककालोपदेशो वा एकदेशोपदेशो वा' इति । शशशृङ्गं न सम्भवतीत्यादौ ईदृशमेकत्वं संशब्दार्थः—शशत्वेन सह एकत्र शृङ्गं न भवतीति । प्रमाणेन सह एकदा इदं न भवतीति विवक्षया इदं न सम्भवतीति यदोच्यते तदा सम्भवतेः प्रमित्यर्हत्वपरतायां पर्यवसानं भवति । एवं प्रकरणाद्यनुरोधेन विशेषावगमेऽपि एकीभवनं सङ्गमरूपं यौगिकं सम्भवपदस्य मुख्यमभिधेयम् । तथा च

> ऊर्ध्वं त्रिरात्रात् सम्भव इत्येके । यदर्तुमती भवत्युपरतशोणिता तदा सम्भवकालः ।

इति गोभिलगृह्य व्याख्यात्रा केनचिद्यदुक्तम्—"सम्भवति गर्भोऽस्मादिति सम्भवः सङ्गमः" इति तत्र स्वारस्यं मन्दमिति विज्ञातव्यमिति ।

---

# मदिरेक्षणा ॥ (3)

---

अस्मिन् विषये तृतीयमिदमस्माभिर्लिख्यते । अत्र 'वैदिकमनोहरयोः' प्रीत्यै निष्कृष्य अवधेयविषयोद्धारं कुर्मः ।

१ भरतनाट्यानुसारेणोक्तमर्थमपेक्ष्य अर्थान्तरं सर्वमस्वरसमित्येतत् स्थितम् ।

२ अस्वारस्यं सोढ्वा अथ वा तमर्थमविज्ञातं कृत्वा अर्थान्तरपरीक्षायां मल्लिनाथादिरीत्या विशेष्यनिघ्नत्वमाश्रित्य मत्ताद्यर्थवर्णने अनुपपत्तिलेशोऽपि नास्तीत्येतदपि स्थितम् ।

३ 'यत्र सन्धिविशेषेण ह्रस्वान्तत्वं नास्ति'; —मदिरलोचना इत्यत्र ह्रस्वान्तत्वमस्ति । 'मदिरेक्षणा' इत्यत्र अवर्णेवर्णोभयस्थाने एकारस्य एकादेशस्यैव श्रवणेन ह्रस्वान्तत्वं नास्ति एवं मदिराक्षीत्यादौ द्रष्टव्यम् ।—

तत्र सुरा ईक्षणं इति छित्त्वा पदद्वयमङ्गीकृत्य तन्निष्पन्नं समासं,सुराव-न्मनोहरेक्षणयुक्तेति तदर्थं च शाकुन्तलव्याख्याने श्रीनिवासदीक्षितोक्त-रीत्या यद्वदन्ति तदपि नानुपपन्नम् । यत्तु मल्लिनाथेनायमर्थो दूषित इति तन्न । दूषणानुपलम्भात् ।

अथ "यद्यपि माद्यत्यनेनेति मदिरा सुरेति प्रसिद्धं तथाऽपि ...." इति सुरारूपमर्थमुल्लङ्घ्य तमुपेक्ष्यार्थान्तरप्रदर्शनात् अयमर्थस्तेन न सोढ इति चेन्न । नार्यो मदिरलोचना इत्यत्र सोऽर्थो न सम्भवतीत्यनेनैव हेतुना तदर्थपरित्यागस्य तेन स्पष्टमावेदनात् । असम्भवस्थले अप्रसिद्धार्थान्तर-स्वीकारनिर्बन्धेऽपि सति सम्भवे प्रसिद्धार्थोपादानमेव युक्तमिति श्रीनिवा-सदीक्षितस्याशयादित्यास्तां तावत् । एवमपि मल्लिनाथेन सोऽर्थो दूषित इति यद्युच्येत तर्हि खञ्जनार्थोऽपि तेन दूषित एव । मदिरशब्दस्य मदकरमात्रार्थकथनात् । अर्थान्तरस्यानुपपन्नत्वावगमनात् ।

४ 'मदिरो मत्तखञ्जनः' इति कोशसिद्धेऽर्थे स्थिते सुरारूपार्थग्रहणमनु-पपन्नमिति दूषितम् । इदमयुक्तम् । अर्थान्तरस्य अर्थान्तरादूषकत्वात् । वस्तुतस्तु अयं कोश एवाप्रामाणिकः अविद्यमान इति न्यरूपयाम । अभ्युपगतं च । अत्र वादस्य विश्रान्तिरुचिता ।

५ अथापि 'मदिरो मत्तखञ्जनौ' इति कोशान्तरव्यपदेशेन खञ्जनार्थो न दुष्यतीति प्रतिज्ञायते । अयं कोशः कस्य । कुत्र सुलभः । न किमपि ज्ञायते । एतन्मात्रदर्शने 'तुरङ्गगरुडौ तार्क्ष्यौ' इतिवत् 'मदिरौ' इति भाव्यमिति भातीत्यवोचाम । 'नैतदेवम् । मदिरशब्दः मत्तञ्च खञ्जनं च ब्रूत इति प्रकरणावसेयम्' इत्युच्यते । एवंविधं प्रकरणं दर्शितं चेत् अवश्यम् एवमेतदित्यध्यवसास्यामः ।

६ अतीतशतकावधि अस्य कोशस्य केनाप्यविज्ञातत्वात् नायं विस्रम्भार्हः । म. म. परवस्तु रङ्गाचार्यवर्यीयं शब्दार्थसर्वस्वं अल्पमेव मुद्रितम् ।

मदिरपदार्थः अमुद्रितभागान्तर्गत इति वदन्ति । विचारयन्तः स्मः ।

सर्वथा खञ्जनार्थवाचित्वं मदिरपदस्य न विश्वसनीयप्रमाणसिद्धम् । निरूपणमन्तरा 'अस्माकं विश्वासः केनापि चालयितुं न शक्यः' इत्यातिष्ठमानैः तूष्णीं स्थातव्यम् । न परोक्तार्थविमर्शे प्रवर्तितव्यम् । विशेषतश्च व्याख्यातृभिरुक्तस्यार्थस्य विमर्शे । अन्येषामस्मिन्नर्थे अति-विश्वासात् ।

II

एवं प्रधानविषयोद्धारमकार्ष्म । अथानुषाङ्गिककतिपयविषयोद्धारं कुर्मः ।

७ कोशः कोशत्वेन न प्रमाणमित्यवोचाम । "प्रचुरप्रयोगदृष्ट्या तैः प्रतिपाद्यमानं प्रमाणयन्ति प्राज्ञाः" इति वदद्भिरिदमिदानीमङ्गीकृतम् ।

८ "कोशकारा हि न मतविशेषाभिमानिनः" । न । अमरसिंहहेम-चन्द्रादयो जैनमतधुरन्धरा इति सुप्रसिद्धमेतत् ।

९ ...."विषयभेदेन.... सर्वेऽप्युपादेयवचसः सर्वेऽपि हेयवचसश्च" । एवञ्च 'पुण्डरीकं सिताम्भोजं' इति वदन् अमरसिंहः प्रामाणिकानेकाभि-युक्तवचनविरोधात् हेयवचाः । एवं विरोधाभावे उपादेयवचाश्च । नेदं कस्याप्यनभिमतम् । एवमेव 'मदिरो मत्तखञ्जनः' इत्यादि वदन्तो ऽनुपादेयवचसः । अनन्यथासिद्धमूलप्रमाणविरहात् ।

१० "निर्वाहप्रदर्शनं हि न पर्यायतानिराकरणम्" । कुतो न । 'वृषलस्य भार्या' इत्युक्ते न निर्वाहापेक्षा । 'वृषलस्य पत्नी'त्यत्र तु निर्वाहापेक्षा भवति । यदि पर्यायता किंकृतोऽयं विशेषः । गृहिणीमात्रवाची भार्याशब्दः । यज्ञसंयोगवद्गृहिणीवाची पत्नीशब्दः । कथमनयोः पर्यायता । एकार्थ-वाचित्वं हि पर्यायत्वम् ।

गङ्गापदं गङ्गातीरपदं च न पर्यायौ । नात्र विप्रतिपत्तिः । किमेवं

वदद्भिः गङ्गायां घोष इति लाक्षणिकप्रयोगो दूषितः स्यात् । एवमेव प्रकृते अपर्यायत्वमास्थितैः वृषलस्य पत्नी ति प्रयोगे न दूषितो भवतीति न विस्मरामहे ।

११ "आलङ्कारिकाणां जीवसर्वस्वमुपैनव" । न । काव्यस्य जीवः(आत्मा) ध्वनिः । तत्रापि रसः । शब्दार्थौ शरीरम् । अस्य शरीरस्य शोभाधानद्वारा रसरूपस्य आत्मनः उपस्कारकतया तदङ्गं अलङ्कारः । अङ्गिनः रसस्यानुगुणतया, अविरोधेन, अलङ्कारस्य निवेशनमिति साहित्यविदां रहस्यम् ।

१२ "लक्षणा अध्याहार इत्यादिकं न तत्त्वेन दोषः" । कस्मात् । लक्षणा लक्षणात्वेनैव दुष्यति । अध्याहारोऽध्याहारत्वेनैव । अगत्या तु तत्र तत्र दोषत्वे सत्येव लक्षणादिकमाश्रीयते । अन्यथा वाक्यस्यैव वैयर्थ्यापातात् ।

'सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः ।'

इति न्यायेन यथाश्रुतार्थपरित्यागात् ।

१३ "निषादस्थपतिन्यायात् किं 'राजपुरुष'स्थले ।
सामानाधिकरण्यस्य स्वीकारो भवितुं क्षमः ॥"

उच्यते ।

राजा चासौ पूरुषश्चेत्येवं विग्रहसंश्रये ।
सामानाधिकरण्यस्य को बाधो राजपूरुषे ॥
निषादस्थपतिन्यायादयमर्थो वरं परात् ।
अत्रैव लोक इत्यादि श्रामाण्यमवधीयताम् ॥
न्यायं तत्पुरुषादाहुः सम्भवे कर्मधारयम् ।
गमकस्य तु सद्भावे राज्ञः पूरुष इष्यते ॥

यत्र संस्कृतमिदं न भाषते संस्कृतेन कथितेन मोदते ।
खण्डयन्नपि परं कदाऽपि न ग्राम्यवर्त्म सुजनोऽवगाहते ॥

परीवादः शक्त्या भवतु परिहासः प्रसरतु
क्रुधोद्दण्डं भर्त्स्येमहि कथमपि क्षुब्धमनसः ।
भविष्यामो नाम्नी वयमथ तु निष्ठामृजुपथं
भजन्तः स्थास्यामोऽनृजुदमनघट्टोद्दढधियः ॥

---

[अस्य विषयस्य आरम्भे प्रथमपङ्क्तौ "मनोहरयोः" इत्यस्य स्थाने "मनोहराया इति पठनीयम् । ]

---

# छन्दोभङ्गपरिहारः ॥

(V. R. Srinivasa Tatacharya Siromani)

मात्रावर्णविभेदेन द्विविधे लौकिके छन्दसि तत्तद्गणलघुगुरुयत्यादिनियमः छन्दोग्रन्थेषु निरूप्यते । तदनुरोधेन कविभिः क्वचित् दीर्घादेर्ह्रस्वत्वादिकं क्वचिदधिकवर्णोच्चारणं कुत्रचिद्वर्णत्यागश्च क्रियते । रघुवंशे एकोनविंशसर्गे त्रयोविंशश्लोकस्य—'कल्पितपुष्पशयनाँल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ।' इति पूर्वार्धं विद्यते । अत्र मल्लिनाथः— "ङीबन्तस्यापि दूतीशब्दस्य छन्दोभङ्गभयात् ह्रस्वत्वं कृतम् । 'अपि माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिराम्' इत्युपदेशात्" इति व्याचष्ट । अस्य वचनस्य, दीर्घस्य ह्रस्वत्वं कार्यमित्येव यदि तात्पर्यं तदा 'दीर्घं ह्रस्वं कुर्यात् । तद्यथा माषं मषं कुर्या'दित्येवंरीत्योपदेशस्स्यात् । पूर्ववाक्ये अपिशब्दप्रयोगः 'छन्दोभङ्गं त्यजेद्गिराम्' इति सामान्येनोपदेशश्च न भवेत् । अतो येन केनापि प्रकारेण छन्दोभङ्गपरिहारः सम्पादनीय इत्यत्रैव तात्पर्यमङ्गीकार्यम् । पूर्वोक्ते 'कल्पितपुष्प....दर्शन' इत्यत्र रथोद्धतावृत्तम् । 'रान्नराविह रथोद्धता लगौ' इति लक्षणानुरोधेन एकैकस्मिन् पादे द्वितीयेन नगणेन भाव्यम् । दूतीकृतेत्युक्तौ भगणः स्यात् । नगणसम्पादनाय दूतिकृतेति प्रायुज्यत ।

कुमारसम्भवे तृतीयसर्गे चतुश्चत्वारिंशश्लोकस्य 'आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श' इत्युत्तरार्धं वर्तते । अत्र मल्लिनाथः 'केचित्साहसिकाः त्रिलोचनमिति पेठुः । त्र्यम्बकमित्युक्ते पादपूरणव्यत्यासात् त्रियम्बकमिति पादपूरणार्थोऽयमियङादेशश्छान्दसो महाकविप्रयोगादभियुक्तैरङ्गीकृत' । इति व्यमृणात् । अत्र उपजातिवृत्तम् । 'उपेन्द्रवज्रा जतजास्ततो गा'विति लक्षणमनुरुध्य त्रियम्बकमिति पादे त्रियम्बकमिति जगणसहितं 'तन्वादीनां बहुलं छन्दसी'ति वार्तिकसिद्धेयङ्घटितं चतुरक्षरं छान्दसं रूपं प्रयोक्तव्यमापतितम् । त्र्यम्बकमिति पाठे जगणो न स्यात् रगणः स्यात् । ततश्च उपेन्द्रवज्रालक्षणविरोधो भवेदिति तथा प्रायुज्यत ।

ध्वन्यालोके प्रथमोद्योते उदाहृतस्य 'शिखरिणि क्व नु नाम' इति पद्यस्य व्याख्याने लोचने 'तवेति भिन्नं पदम् । समासेन विगलिततया सा न प्रतीयते । तव दशतीत्यभिप्रायेण । तेन यत्केचिदाहुः वृत्तानुरोधात् त्वदधरपाटलमिति न कृतमिति तदसदेव' इत्यभिधानेन वृत्तानुरोधादधिकाक्षरपठनमिति कथनमर्थस्वारस्याभावे युक्तमिति व्यञ्जनेन वृत्तानुरोधेनाधिकाक्षरपाठो युक्त इत्यवगम्यते ।

रघुवंशे पूर्वोक्तसर्गे पञ्चाशश्लोकस्य 'कामयानसमवस्थया तुलाम्' इति तुरीयपादो दृश्यते । अत्र शाकुन्तलादाविव काममानेति प्रयोगे पूर्वोक्तरथोद्धतालक्षणं विरुध्येतेति कृत्वा वर्णत्यागपूर्वकं कामयानेत्यपठ्यत । अत्र मल्लिनाथः 'कमेर्णिङन्ताच्छानच् । 'अनित्यमागमशासनम्' इति मुमागमाभावः एतदेवाभिप्रेत्योक्तं वामनेनापि—'कामयानशब्दः सिद्धोऽनादिश्चेत्' इति मुमागमत्यागस्य शास्त्रीयतां प्रत्यपादयत् । अधिकरणसारावल्यां 'आहुत्योर्जन्मवत्त्वम्' इति तत्त्वाभाव्यापराधिकरणश्लोकस्य 'द्युभ्वोः पुण्यप्रसाध्यं फलमिह पठितं नास्ति भोगश्च मध्य' इति चतुर्थपादोऽस्ति । अत्र 'न भूसुधियोः' इति यण्णिषेधात् द्युभुवोरिति वक्तव्यमिति शङ्का भवति । अत्रायं समाधिः । द्युभ्वोरिति तु न लौकिकं रूपम् । अपि तु 'छन्दस्युभयथे'ति सूत्रेण भूसुधियोर्यण् स्यादियङुवङौ चेत्यर्थकेन प्राप्तेन यणा घटितं छान्दसं रूपम् । 'नञ्-

घटितमनित्यम्' इति परिभाषया 'नभूसुधियोः' इति यण्निषेधस्यानित्यत्वेन सुभ्र्वोरिति लौकिकं रूपं सिद्ध्यतीत्युक्तिस्तु 'छन्दस्युभयथे'त्यस्य वैयर्थ्यापत्त्या न युज्यते । तस्मात् ऽत्र्यम्बकमिति प्रयोगे कार्ये वृत्तानुरोधात् छान्दसचतुरक्षरत्रियम्बकशब्दप्रयोगवदत्रापि स्रग्धरापादे 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेय'मिति लक्षणानुसारेणादौ सुभ्र्वोः पु इति मगणस्य प्रयोक्तव्यत्वात् छान्दसं ह्यक्षरं कामयानेतिवन्न्यूनाक्षरत्वेऽप्युपपन्नं सुभ्र्वोरिति पदमभ्यधीयत । सुभुवोरिति पाठे आदौ सगणः स्यात् । एकमक्षरमधिकं च भवेदिति स्रग्धरालक्षणविरोधः प्रसजेत् । अतो सुभ्र्वोरिति पाठ एव समञ्जसो वेदितव्यः । महाकविप्रयोगेषु स्थितस्य गतिश्चिन्तनीया ।

---


# संस्कृतप्रचारिणी सभा, येपेंडु, मद्रास्॥

१ उद्देश्यम्—संस्कृतभाषायाः प्रचारद्वारा राष्ट्रभाषात्वापादनम् ।

२ साधनम्—स्वल्पश्रमसाध्याः चतस्रः परीक्षाः ।

३ परीक्षानामानि—परिचयः, अभिज्ञः, समर्थः, कोविदः ।

४ शुल्कक्रमः— ४ आण, ८ आण, १ रूप्य, २ रूप्य

५ फलम्—उत्तीर्णानामुपाधिपत्रम् ।

६ केन्द्रम्—पञ्चान्यूनाभ्यर्थिनां सत्त्वे केन्द्रता स्वीक्रियेत ।

७ परीक्षासमयः—प्रतिवत्सरं द्विवारं— जनवरी-जूलै मासयोः ।

८ पाठ्यक्रमः—परीक्षामन्त्रिणः प्राप्तव्यः ।

सङ्केतः— परीक्षामन्त्री,

संस्कृतप्रचारिणी सभा,

येपेंडु P. O., मद्रास् ।

# जितं त्रिशक्त्या ॥

(L. Bharathan, Eranellur)

स्वापत्यसाम्राज्यपदेऽतिदीप्रे
मायापताकाध्वजमुन्नमय्य ।
प्रचारणाशास्त्रबलावलिप्ताः
ये रेजुरैश्वर्यमदान्धचित्ताः ॥ १ ॥

विचित्रितैः पाटलितैः शिशूना-
मावर्जकैश्चारुपतङ्गपत्रैः ।
विनिर्मितं क्रीडनकं जगत्तु
विक्रीय ये वा कलयन्ति कार्यम् ॥ २ ॥

अदन्ति गावोऽपि यदत्र नैतत्
पिण्याकमम्भोधिपथेन नीताः ।
रूपान्तरीकृत्य पुनर्विमुक्तं
ये स्वादयन्त्येव सुधोपमं नः ॥ ३ ॥

जरातिवृद्धं जगतीतलेऽस्मिन्
उत्तुङ्गमुन्नामितधीरशीर्षम् ।
हिमावदातं विगणय्य शैलं
ये भारते पावकमाववर्ष ॥ ४ ॥

तेषां विनाशो मनसः प्रहर्षं
सहोदरा वो विदधाति नो किम् ? ।
न किं प्रमोदास्पदमेतदद्य
जितं त्रिशक्त्या महनीयकीर्त्या ॥ ५ ॥

विलूनविद्वेषिकुलावलेपा
विजित्वरोद्दिस्वरवीर्ययुक्ता ।
विनान्तरायं विशदानुभावा
विभाति राजद्विभवा त्रिशक्तिः ॥ ६ ॥

॥ श्रीः ॥

# उद्यानपत्रिका ॥

अष्टादशवर्ष-

## विषयसूची ॥

# UDYANA PATRIKA

[XVIII Year]

## CONTENTS


1 मेनका । 2, 9, 17, 29, 41.

2 सुभाषितनीवी । [पण्डित श्रीनिवासताताचार्यः] 3, 11, 19, 31, 43.

3 पत्रिका । 5.

4 अभिधेयविशेषः । 5, 13, 21, 45.

5 आक्षेपप्रतिक्षेपः । [V. R. Srinivasa Tatacharya, Siromani.] 15.

6 यच्छब्दैकशेषः । ,, 25.

7 भोग्यशब्दार्थः । ,, 28, 37.

8 मदिरेक्षणा । [2] 33, 48.

मदिरेक्षणा । [3] 49.

9 प्रकीर्णकम् । 39.

10 पुस्तकपरामर्शः । 40.

11 छन्दोभङ्गपरिहारः । [V. R. Srinivasa Tatacharya Siromani] 52.

12 संस्कृतप्रचारिणी सभा येपेंडु, मद्रास । 54.

13 जितं त्रिशाखया । [Bharathan, Eranellur] 55.

शास्त्रानुबन्धः ।

कुवलयानन्दः—बुधरञ्जनीसमेतः । 105—140.


984